श्रीगणेशाय नमः ॥ भवसंचितपापौघविध्वंसनविचक्षणं ॥ विघ्नांधकारभास्वंतं विघ्न
राजमहं भजे ॥१॥ चूडामणीकृतविधुर्वलयीकृतवासुकिः ॥ भवो भवतु भव्याय ली
लीलातांडवपंडितः ॥१॥ निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरंतनोक्तिभिः ॥
विशदीकरवाणि कौतुकान्नतु राजीवदयावशंवदः ॥२॥ सद्द्रव्या गुणगुंफिता सुकृ
तिनां सत्कर्मणा ज्यापिका सत्सामान्यविशेषनित्यमिलिताऽभावप्रकर्षोज्वला ॥
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धांतमुक्तावली विन्यस्ता मनसो मुदं वितनु
तां सद्युक्तिरेषा चिरं ॥३॥ विघ्नविघाताय कृतं मंगलं शिष्यशिक्षायै निबध्नाति ॥ नूत
नेत्यादि ॥ नूतनजलधररुचये गोपवधूटीदुकूलचौराय ॥ तस्मै कृष्णाय नमः सं
सारमहीरुहस्य बीजाय ॥१॥ ननु मंगलेन विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं वि

नापि मंगले नास्तिकादीनां ग्रंथे निर्विघ्नपरिसमाप्तिदर्शनादिति वेन्न॥ अविगीतशिष्टाचा
१ रविषयत्वेन मंगलस्य सफलत्वसिद्धौ तत्र फलाकांक्षायां संभवति दृष्टफलकत्वे अदृष्टफल
कल्पनाया अन्याय्यत्वादुपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते॥ इत्थं च यत्र मंगले नदृश्यते
तत्र जन्मांतरीयं तत्कल्प्यते॥ यत्र च सत्यपि मंगले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्न
प्राचुर्यं वा बोध्यं॥ प्रचुरस्यास्यैव बलवत्तरविघ्ननिवारणे कारणत्वं बोध्यं॥ विघ्नध्वंसस्तु मंगलस्य द्वा
रमित्याहुः प्राचः॥ नव्यास्तु मंगलस्य विघ्नध्वंस एव फलं॥ समाप्तिस्तु तत्सहकृतबुद्धिप्रतिभादि
कारणकलापात्॥ न च स्वतःसिद्धविघ्नविरहवता कृतस्य मंगलस्य निष्फलत्वापत्तिरिति वाच्यं
इष्टापत्तेः॥ विघ्नशंकया तदाचरणात्॥ तथैव शिष्टाचरणात्॥ नैवं तस्य निष्फलत्वे तद्बोधकवे
दाऽप्रामाण्यापत्तिर्वाच्यं॥ सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्॥ अत एव पापभ्रमेण कृतप्रा १
रिति

यस्मिंस्तस्य निष्फलत्वेपि न तद्बोधकवेदाप्रामाण्यं॥ मंगलं तु विघ्नध्वंसविशेषकारणं विघ्नध्वं
सविशेषे च विनायकस्तवपाठादिः॥ क्वचित्तु विघ्नप्रागभावो विघ्नात्यंताभाव एव समाप्तिसा
धनं॥ प्रतिबंधकसंसर्गाभावस्यैव कार्यजनकत्वात्॥ इत्थं च नास्तिकादिकृतग्रंथेषु जन्मांतरीय
मंगलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यंताभावो वा अस्तीति न व्यभिचार इत्याहुः॥ संसा
रेति॥ संसार एव महीरुहो वृक्षस्तस्य बीजाय॥ एतेन ईश्वरे प्रमाणं दर्शितं॥ यथाहि घटादि
कार्यं कर्तृजन्यं तथा क्षित्यंकुरादिकमपि॥ न च कर्तृत कर्तृत्वमस्मदादीनां संभवतीत्यतस्तत्क
र्तृत्वेनेश्वरसिद्धिः॥ न च शरीराजन्यत्वेनाकर्तृजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यं॥ अप्रयो
जकत्वात्॥ मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलतर्कः॥ द्यावाभूमी जनयन्
देव एकः॥ विश्वस्य कर्ता भुवनस्य गोप्ता॥ इत्यादय आगमा अप्यनुसंधेयाः॥ द्रव्यंगुण इत्या

दि॥ द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकं॥ समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः॥
२ सप्तमस्याभावकथनादेव षण्णां भावत्वं प्राप्तं॥ तेन भावत्वेन पृथगुपन्यासो न कृतः॥ एते च प
दार्था वैशेषिकप्रसिद्धाः नैयायिकानामप्यविरुद्धाः॥ प्रतिपादितं चैवमेव भाष्ये॥ अत एवो
पमानमणौ सप्तपदार्थभिन्नतया सादृश्यस्यातिरिक्तपदार्थत्वमाशंकितं॥ ननु कथमेते
एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात्॥ तथाहि मण्यादिसमवहितेन व
ह्निना दाहो न जन्यते॥ तच्छून्येन तु जन्यते॥ तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नश्यते॥
उत्तेजकेन मण्याद्युपसारेण तत्र जन्यत इति कल्प्यते॥ एवं सादृश्यमपि अतिरिक्तः पदार्थ
सिद्धिन षट्सु भावपदार्थेष्वंतर्भवति॥ सामान्येपि सत्वात्॥ यथा गोत्वं नित्यं तथा अश्वत्वमपीति
सामान्येपि सादृश्यप्रतीतेः॥ नाप्यभावत्वेन प्रतीयमानत्वादिति चेन्न॥ मण्याद्यभावविशि २

ष्टवन्ह्यादेर्दाहादिकं प्रति मण्यभावादेरेव वा स्वातंत्र्येण हेतुत्वं कल्प्यते अनेनैव सामं
जस्यैव अनंतशक्तितत्प्रागभावप्रध्वंसकल्पनानौचित्यात् ॥ नचोत्तेजके सति प्रतिबंधकसद्भा
वेपि कथं दाह इति वाच्यं ॥ उत्तेजकाभावविशिष्टमण्यभावस्यैव हेतुत्वात् ॥ एवं सादृश्यमपि न प
दार्थांतरं ॥ किंतु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं ॥ यथा चंद्रभिन्नत्वे सति चंद्रगताह्लाद
कादिमत्त्वं मुखे चंद्रसादृश्यमिति ॥ द्रव्याणि विभजते ॥ क्षित्यप्तेजोमरुद्व्योमकालदिग्दे
हिनो मनः ॥ २ ॥ द्रव्याणि ॥ क्षितिः ॥ पृथिवी ॥ आपो ॥ जलानि ॥ तेजो वन्ह्यादि ॥ मरुद्वायुः ॥
व्योम आकाशः ॥ कालः ॥ दिक् ॥ देही ॥ आत्मा ॥ मनः ॥ एतानि नव द्रव्याणीत्यर्थः ॥ ननु द्रव्यत्व
जातौ किं मानं ॥ न हि तत्र प्रत्यक्षं प्रमाणं ॥ घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न ॥ कार्य
समवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदक

तयाद्रव्यत्वजातिसिद्धिरिति॥ननुदशमद्रव्यंतमः कुतोनोक्तं॥तद्धिप्रत्यक्षेणगृह्य
ते॥तस्यचरूपवत्वात्कर्मवत्वाच्चद्रव्यत्वं॥तच्चगंधशून्यत्वान्नपृथिवी॥नीलरूपवत्वाच्च
नजलादिकं॥तत्प्रत्यक्षेचालोकनिरपेक्षंचक्षुः कारणमितिचेन्न॥आवश्यकतेजो
भावेनैवोपपत्तौ द्रव्यांतरकल्पनायाअन्याय्यत्वात्॥रूपवत्ताप्रतीतिस्तुभ्रमरू
पा॥कर्मप्रतीतिरपिआलोकाऽपसरणोपाधिकीभ्रांतिर्वा॥तमसोऽतिरिक्तत्वेऽनंताऽ
भावादिकल्पनागौरवंस्यात्॥सुवर्णस्ययथातेजस्यंतर्भावस्तथावक्ष्यते॥गुणान्
विभजते॥अथगुणाइति॥द्रव्याश्र्यथ गुणारूपंरसोगंधस्ततःपरं॥स्पर्शःसंख्या
परिमितिःपृथक्त्वंचततःपरं॥संयोगश्चविभागश्चपरत्वंचापरत्वकं॥३॥बुद्धिस्सु
खंदुःखमिच्छाद्वेषोयत्नोगुरुत्वकं॥द्रव्यत्वंस्नेहसंस्कारावदृष्टंशब्दएवच॥४॥ ३

एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कंठतश्चशब्देन च दर्शिताः॥ तत्र गुणत्वजातिसि
द्धिरग्रे वक्ष्यते॥ कर्म्माणि विभजते॥ उत्क्षेपणमिति॥ उत्क्षेपणं ततोऽपक्षेपणमाकुंचनं
तथा॥ प्रसारणं च गमनं कर्माण्येतानि पंच च॥५॥ कर्मत्वजातिस्तु प्रत्यक्षसिद्धा॥ एवमुत्क्षे
पणत्वादिकमपि॥ ननु भ्रमणादिकमपि पृथक्कर्म्माधिकतया कुतो नोक्तमत आह॥ भ्रम
णमिति॥ भ्रमणं रेचनं स्यंदनोर्ध्वज्वलनमेव च॥ तिर्यग्गमनमप्यत्र गमनादेव लभ्यते॥ सा
मान्यं निरूपयति॥ सामान्यमिति॥ सामान्यं द्विविधं प्रोक्तं परं चाऽपरमेव च॥ तल्लक्षणं तु नि
त्यत्वे सत्यनेकसमवेतत्वं॥ अनेकसमवेतत्वं संयोगादीनामप्यत उक्तं नित्यत्वे सतीति॥ नि
त्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तं अनेकेति॥ नित्यत्वे सत्य
नेकवृत्तित्वमत्यंताभावेप्यस्त्यतो वृत्तिसामान्यं विहाय समवेतेत्युक्तं॥ एकव्यक्तिमा

४ त्रवृत्तिस्त्वं जातिः॥ तथा चोक्तं॥ व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः॥६॥ रूपहानि
रसंबंधो जातिबाधकसंग्रहः॥ ॥द्रव्यादीति॥ द्रव्यादित्रिकवृत्तिस्तु सत्तापरतयोच्यते॥७॥
परभिन्नातु या जातिस्सैवापरतयोच्यते॥ द्रव्यत्वादिकजातिस्तु परापरतयेष्यते॥८॥ पर
त्वमधिकदेशवृत्तित्वं॥ अपरत्वमल्पदेशवृत्तित्वं॥ सकलजात्यपेक्षया व्यापकत्वादधि
कदेशवृत्तित्वाच्च सत्तायाः परत्वं॥ तदपेक्षया वान्यासां जातीनामपरत्वं॥ व्यापकत्वा
त्परापि स्याद्व्याप्यत्वादपरापि च॥ ॥पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्ति
त्वाच्च परत्वं॥ सत्तापेक्षया व्याप्यत्वादल्पदेशवृत्तित्वाच्च द्रव्यत्वस्याऽपरत्वं॥ विशेषं नि
रूपयति॥ अंत्यैतँ इति॥ अंत्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः॥९॥ अंतेऽवस्थानेवर्तंत
इति अंत्याः॥ यदपेक्षया विशेषो नास्तीत्यर्थः॥ घटादीनां द्व्यणुकपर्यंतानां तत्तदव ४

ममवादिभेदात्परस्परंभेदः॥परमाणूनांपरस्परभेदकोविशेषएव॥सतुस्वतएव
व्यावृत्तः॥तेनविशेषांतरापेक्षानास्तीतिभावः॥समवायंदर्शयति॥घटादीनामिति॥
घटादीनांकपालादौद्रव्येषुगुणकर्मणोः॥तेषुजातेश्चसंबंधःसमवायःप्रकीर्तितः
१२॥अवयवावयविनोर्गुणगुणिनोर्जातिव्यक्त्योःक्रियाक्रियावतोर्नित्यद्रव्यविशेष
योश्चयःसंबंधःसमवायः॥समवायत्वंनित्यसंबंधत्वं॥तत्रप्रमाणंतु॥गुणक्रियादि
विशिष्टबुद्धिःविशेषणविशेष्यसंबंधविषयाविशिष्टबुद्धित्वात्॥दंडीपुरुषइतिविशि
ष्टबुद्धिः॥वदित्यनुमानेनसंयोगादिबाधात्समवायसिद्धिः॥नचस्वरूपसंबंधेन
सिद्धसाधनमर्थांतरंवा॥अनंतस्वरूपाणांसंबंधत्वकल्पनेगौरवात्॥लाघवादे
कसमवायसिद्धिः॥नचसमवायस्यैकत्वेवायौरूपवत्ताबुद्धिप्रसंगः॥तत्ररूपसम

५

वायसत्वेपिरूपाभावात्॥ नैवमभावस्यापिवैशिष्ट्यंसंबंधांतरंसिध्येदितिवाच्यं॥ त
स्यनित्यत्वेभूतलेघटानयनानंतरमपिघटाभावबुद्धिप्रसंगात्॥ घटाभावस्यतत्रस
त्वात्॥ तस्यनित्यत्वात्॥ अन्यथादेशांतरेपितत्प्रतीतिर्नस्यात्॥ वैशिष्ट्यस्यतत्रसत्वा
त्॥ ममतुघटेपाकरक्ततादशायांश्यामरूपस्यनष्टत्वात्नतद्वत्ताबुद्धिः॥ वैशिष्ट्य
स्यानित्यत्वेऽनंतवैशिष्ट्यकल्पनेतवैवगौरवं॥ इथंचतत्तत्कालीनंतत्तद्भूतलादिकंतत्तद
भावानांसंबंधः॥ अभावंविभजते॥ अभावस्त्विति॥ अभावस्तद्विधासंसर्गोन्योन्या
भावभेदात्॥ अभावत्वंद्रव्यादिषट्कान्योन्याभावत्वं॥ संसर्गेति॥ संसर्गाऽभावाऽन्यो
न्याभावभेदादित्यर्थः॥ अन्योन्याभावस्यैकविधत्वात्तद्विधाभावाऽभावसंसर्गाऽभावं
विभजते॥ प्रागभावइति॥ प्रागभावस्तथाध्वंसोप्यत्यंताभावएवच॥ १२॥ एवंत्रैविध्य

मापन्नःसंसर्गोऽभावइष्यते॥ ॥संसर्गाभावत्वमन्योन्याऽभावभिन्नाऽभावत्वं॥अ
न्योन्याऽभावत्वंतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाऽभावत्वं॥विनाश्यभावत्वं
प्रागभावत्वं॥जन्याऽभावत्वंध्वंसत्वं॥नित्यसंसर्गाऽभावत्वंअत्यंताऽभावत्वं॥यत्रतुभू
तलाऽद्घटादिकमपसारितंपुनरानीतंचतत्रघटकालस्यसंबंधाऽघटकत्वाद
त्यंताभावस्यनित्यत्वेपिघटकालेनघटात्यंताऽभावबुद्धिः॥तत्रोत्पादविनाशशा
लीतुर्थोऽयमभावइतिकेचित्॥अत्रध्वंसप्रागभावयोरधिकरणेनाऽत्यंताऽभा
वइतिप्राचांमतं॥श्यामघटेरक्तोनाऽस्तिरक्तघटेश्यामोनास्तीतिधीस्तुप्रागभा
वंप्रध्वंसाऽभावंवाऽवगाहते॥नतुतदत्यंताऽभावंतयोर्विरोधात्॥नव्यास्तुतत्र
विरोधेप्रमाणाऽभावात्॥ध्वंसादिकालाऽवच्छेदेनाऽपिअत्यंताऽभावोवर्ततइत्या

द्रुः॥ नत्वस्वभावानां अधिकरणात्मकत्वं लाघवादितिचेन्न॥ अनंताधिकरणात्मक
त्वकल्पनाऽपेक्षयाऽतिरिक्तकल्पनाया एव लघीयस्त्वात्॥ एवं वा धाराधेयभावो
ऽप्युपपद्यते॥ एवं तत्तच्छब्दरसगंधाद्यभावानां प्रत्यक्षत्वमुपपद्यते॥ अन्यथा तत्त
दधिकरणानां तत्तदिंद्रियाऽग्राह्यत्वात्प्रत्यक्षत्वं न स्यात्॥ एतेन ज्ञानविशेषाऽत्मक
त्वे कालविशेषात्मकत्वमप्यभावस्येति प्रत्युक्तं॥ अप्रत्यक्षत्वापत्तेः॥ इदानीं पदार्था
नां साधर्म्यवैधर्म्ये वक्तुमुपक्रमते॥ समानानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते॥
समानो धर्मो येषां ते सधर्माणस्तेषां भावस्साधर्म्यं॥ समानो धर्म इति पालिता
ऽर्थः॥ एवं विरुद्धो धर्मो येषां ते विधर्माणस्तेषां भावो वैधर्म्यं॥ विरुद्धो धर्म इति फ
लितार्थः॥ ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवाऽस्ति॥ ईश्वरादिज्ञानविषयतायाः

केवलान्वयित्वात् एवमभिधेयत्वं प्रमेयत्वादिकं बोध्यं ॥३॥ त्येति ॥ द्रव्यादयः पंचभा
वा अनेके समवायिनः ॥१३॥ द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं स
मवायित्वं वा ॥ यद्यप्यनेकत्वमभावेप्यस्ति ॥ तथाप्यनेकत्वे सति भाववत्वं ॥ तथा च अनेकभा
ववृत्तिपदार्थविभाजकोपाधिमत्वं पलितार्थः ॥ तेन प्रत्येकं घटादौ नाव्याप्तिः ॥ समवायि
त्वं समवायसंबंधेन संबंधित्वं ॥ न तु समवायवत्वं ॥ सामान्यादावभावात् ॥ सत्तावंतइ
ति ॥ सत्तावंतस्त्रयस्त्वाद्याः गुणादिर्निर्गुणक्रियः ॥ द्रव्यगुणकर्मणां सत्तावत्वमि
त्यर्थः ॥ गुणादिरिति यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रिया
शून्यत्वे गगनादावतिव्याप्तं ॥ तथापि गुणवद्वृत्तिधर्मवत्वं ॥ कर्मवद्वृत्तिपदार्थ
विभाजकोपाधिमत्वं न द्रव्यत्वं गुणवद्वृत्ति कर्मवद्वृत्ति वा किंतु गुणत्वादिकं तथा

आकाशत्वादिकंतुनपदार्थविभाजकोपाधिः॥सामान्येति॥समान्यपरिहीनास्तुसर्वेजा
त्यादयोमताः॥१३॥सामान्यानधिकरणत्वंसामान्यादीनामित्यर्थः॥पारिमांडिल्येति
पारिमांडिल्यभिन्नानांकारणत्वमुदाहृतं॥पारिमांडिल्यमणुपरिमाणंकारणत्वंतद्भि
न्नानामित्यर्थः॥अणुपरिमाणंतुनकस्यापिकारणं॥तद्धिस्वाश्रयारब्धद्रव्यपरिमा
णारंभकंभवेत्तच्चनसंभवति॥परिमाणस्यस्वसमानजातीयोत्कृष्टपरिमाणजन
कत्वात्॥महदारब्धस्यमहत्तरत्ववत्॥अणुजन्यस्याणुतरत्वप्रसंगात्॥एवंपर
ममहत्परिमाणअतींद्रियसामान्यंविशेषाश्चबोध्याः॥आत्ममानसप्रत्यक्षेआ
त्ममहत्वस्यकारणत्वात्परममहत्परिमाणमाकाशादेर्बोध्यं॥तस्यापिनकारण
त्वमित्याचार्याणामाशयइत्यन्येतन्न॥ज्ञानातिरिक्तंप्रत्यकारणतायाएवआचार्यै

रुक्तत्वात्॥इदमपि योगिप्रत्यक्षविषयस्य न कारणत्वं ज्ञायमानं सामान्यं न प्रत्यासत्ति
ज्ञायमाने लिंगेनानुमितिकरणमित्यभिप्रायेण॥ननु कारणत्वं किमत आह॥अन्यथेति॥
अन्यथासिद्धिशून्यस्य नियतापूर्ववर्तिता॥१४॥कारणत्वं भवे तैत्रैविध्यं परिकीर्तितं॥ ॥ स्य
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं॥एवं न्यायनयज्ञैस्तृतीयमुक्तं निमि
त्तहेतुत्वं॥यत्समवेतं कार्यं भवति ज्ञेयं तदत्र समवायिहेतुत्वं॥तत्रासन्नं द्वितीयं जन
कतान्यां तृतीयं परं स्यात्॥तस्य कारणत्वस्य॥तत्रेति समवायिकारणे प्रत्यासन्नं कारणं
द्वितीयं॥समवायिकारणमित्यर्थः॥अत्र यद्यपि तुरीतंतुसंयोगस्य पटऽसमवायिका
रणत्वं स्यात् एवं वेगादीनामपि अभिघाताद्यसमवायिकारणत्वं स्यात्॥एवं ज्ञानादी
नामिच्छाद्यसमवायिकारणत्वं स्यात्॥तथापि पटासमवायिकारणलक्षणे तुरीतंतु

संयोगभिन्नत्वं देयं॥ तुरीतंतुसंयोगस्तु तुरीपटसंयोगं प्रति असमवायिकारणं भव
त्येव॥ एवं वेगादिकं स्पंदनाद्यसमवायिकारणं भवत्येव॥ तत्कार्याऽसमवायिकारणल
क्षणे तत्तद्भिन्नत्वं देयं॥ आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं नास्ति॥ तेन
तद्भिन्नत्वं सामान्यलक्षणे देयमेव॥ अत्रासमवायिकारणप्रत्यासन्नत्वं द्विविधं॥ कार्यै
कार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या वा॥ आद्यं यथा॥ घटादिकं प्रति कपालसंयोगा
दिकमसमवायिकारणं॥ तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन्क
पाले प्रत्यासत्तिरस्ति॥ द्वितीयं यथा॥ घटरूपं प्रति कपालरूपमसमवायिकारणं॥
तत्र घटरूपं प्रति समवायिकारणं घटस्तेन सह कपालरूपस्यैकस्मिन्कपाले प्रत्यास
त्तिरस्ति॥ तथा च क्वचित्समवायिसंबंधेन क्वचित्स्वसमवायिसमवायिसंबंधेनेति फलि

तोर्थः॥ इत्थंचकार्यैकार्थकारणैकार्थाऽन्यतरप्रत्यासत्त्या कारणंज्ञानादिभिन्नमसमवा
यिकारणमिति सामान्यतोलक्षणंपर्यवसन्नं॥ आभ्यांसमवायिकारणाऽसमवायिकारणा
भ्यांपरंभिन्नंकारणंतृतीयंनिमित्तकारणमित्यर्थः॥ इदानीमन्यथासिद्धत्वमेवनिरूपय
ति॥ तदाह॥ येनसहपूर्वभावः॥ यत्कार्यंप्रतिकारणस्यपूर्ववर्तिता येनरूपेणगृह्यतेतत्का
र्यंप्रतितद्रूपमन्यथासिद्धमित्यर्थः॥ यथादंडत्वमिति॥ द्वितीयमन्यथासिद्धमाह॥ का
रणमादाय — यस्य॥ यस्यस्वातंत्र्येणाऽन्वयव्यतिरेकौनस्तः॥ किंतुस्वकारणमादा
यैवतदन्यथासिद्धंयथादंडरूपं॥ तृतीयमन्यथासिद्धमाह॥ अन्यंप्रतिपूर्वभावेज्ञातेत
त्पूर्वभाविज्ञानं॥ अन्यंप्रतिपूर्ववर्त्तित्वंगृहीत्वैवयस्य यत्कार्यंप्रतिपूर्ववर्त्तित्वंगृह्यतेतस्य
तत्कार्यंप्रत्यन्यथासिद्धत्वं॥ यथाघटादिकंप्रत्याकाशस्य॥ तस्यहिघटंप्रतिकारणत्वमाका

शत्वेन स्यात्॥ तत्र शब्दसमवायिकारणत्वं॥ एवं च तस्य शब्दं प्रति कारणत्वं गृहीत्वैव घटा
दिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धं॥ शब्दाश्रयत्वेन कारणत्वे कान्यथासिद्धिरि
ति चेत्॥ पंचमीति गृहाण॥ अथाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत्॥ कंप
त्वादिकं विशेषपदार्थो वेति॥ चतुर्थमन्यथासिद्धमाह॥ जनकं प्रति पूर्ववर्तितामपरि
ज्ञाय न यस्य गृह्यते॥ जनकं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते
तत्कार्यं प्रत्यन्यथासिद्धं॥ यथा कुलालपिता घटादिकं प्रति॥ तस्य कुलालपितृत्वेन घटा
दिकं प्रति जनकत्वेऽन्यथासिद्धिः॥ कुलालत्वेन रूपेण जनकत्वेतिक्षपतिः॥ कुलालमात्र
स्य घटं प्रति जनकत्वात्॥ पंचममन्यथासिद्धमाह॥ अतिरिक्तमथापि यद्भवेन्नियताव
श्यकपूर्ववर्तिनः॥ अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमि

त्यर्थः॥ अत एव प्रत्यक्षे महत्त्वं कारणं॥ अनेकद्रव्यत्वमन्यथासिद्धं॥ तत्राहि महत्त्वमवश्यं
क्लृप्तं तेनाऽनेकद्रव्यत्वमन्यथासिद्धं॥ न वैवं परीक्षे किं विनिगमकमिति वाच्यं॥ महत्त्वत्वजा
तेः कारणतावच्छेदकत्वे लाघवात्॥ एतत्पंचाऽन्यथासिद्धाः दंडत्वादिक[illegible]मादिमं॥ घ
टादौ दंडरूपादि द्वितीयमपि दर्शितं॥ १५॥ तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः॥ पंच
मो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ॥ १६॥ तद्यपि तद्घटं प्रति रासभस्यापि यत्पूर्व
वर्त्तित्वमस्ति॥ तथापि घटजातीयं प्रति सिद्धकारणभावे दंडादिभिरेव तद्व्यक्तेरपि सं
भवे रासभोऽन्यथासिद्ध इति भावः॥ एतेषु पंचस्वन्यथासिद्धेषु मध्ये पंचमोऽन्यथासि
द्धमावश्यकस्तेनैव परेषां चरितार्थत्वात्॥ तथा हि॥ दंडादिभिरवश्यक्लृप्तपूर्ववर्त्तिभि
रेव कार्यसंभवे दंडत्वादिकमन्यथासिद्धं॥ न चैवं परीक्षे किं विनिगमकमिति वाच्यं॥

१० दंडतस्यकारणत्वेदंडघटितपरंपरायाःसंबंधत्वेगौरवात्॥एवमन्येषामपिअनेनैवचरि
तार्थत्वंसंभवतिसमवायिकारणत्वंद्रव्यस्यैवेतिविज्ञेयं॥गुणकर्ममात्रवृत्तिज्ञेयमथाप्यस
मवायिहेतुत्वं॥ ॥असमवायिकारणत्वंगुणकर्मभिन्नानांवैधर्म्यंनतुगुणकर्मणोःसाध
र्म्यमित्यत्रतात्पर्यं॥अथवाअसमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वंतदर्थः॥तेन
ज्ञानादीनामसमवायिकारणत्वविरहेपिनाऽव्याप्तिः॥अन्यत्रनित्यद्रव्येभ्यःआश्रितत्व
मिहोच्यते॥नित्यद्रव्याणिपरमाण्वादीनिविहायाश्रितत्वंसाधर्म्यमित्यर्थः॥आश्रित
त्वंतुसमवायसंबंधेनवृत्तिमत्त्वं॥विशेषणतयानित्यानामपिकालादौवृत्तेः॥इदानींद्रव्य
स्यैवविशिष्यसाधर्म्यंवक्तुमारभते॥क्षित्यादीनांनवानांतुद्रव्यत्वंगुणयोगिता॥स्पष्टं॥
क्षितिर्जलंतथातेजःपवनोमनएवच॥१७॥पराऽपरत्वमूर्तत्वक्रियावेगाऽश्रयाअमी॥ १०

पृथिव्यप्तेजोवायुमनसां परापरत्वं मूर्तत्वं कर्मवत्त्वं वेगवत्त्वं साधर्म्यं॥ ननु यत्र घटादौ परत्वादि
कं नोत्पन्नं तत्राऽव्याप्तिरिति वाच्यं॥ परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विव
क्षितत्वात्॥ मूर्तत्वमपकृष्टपरिमाणवत्त्वं॥ तच्च तेषामेव॥ गगनादिपरिमाणस्य कुतोऽप्य
पकृष्टत्वाभावात्॥ पूर्ववत्कर्मवत्त्वं कर्मसामानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं॥ वेगव
द्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं बोध्यं॥ कालखाऽत्मदिशां सर्वगतत्वं परममहत्त्वं॥ कालाऽका
शाऽत्मदिशां सर्वगतत्वं सर्वमूर्तद्रव्यसंयोगित्वं परममहत्त्वं च॥ परममहत्त्वत्वं जातिवि
शेषः॥ अपकर्षानाश्रयपरिमाणत्वं वा॥ क्षित्यादिपंचभूतानि॥ पृथिव्यप्तेजोवाय्वाकाशा
नां भूतत्वं॥ तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं॥ अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयो
ग्यत्वं बोध्यं॥ तेन ज्ञातो घट इति प्रत्यक्षे ज्ञानस्याप्युपनीतभावविषयत्वात् तद्वत्यात्मनि

११ नातिव्याप्तिः॥न च प्रत्यक्षाविषयरूपादिमति परमाणवादावव्याप्तिः॥तस्यापि स्वरूपयो
ग्यत्वात्॥महत्त्वलक्षणकारणांतराऽसन्निधानाच्च न प्रत्यक्षं॥अथवा आत्मावृत्तिविशेषगु
णवत्वं तत्वं॥चत्वारि स्पर्शवंति हि॥पृथिव्यप्तेजोवायूनां स्पर्शवत्वं॥द्रव्यारंभश्चतुर्षु स्यात्
पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारंभकत्वं॥न च द्रव्याऽनारंभके घटादावव्याप्तिः॥द्रव्यस
मवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥अथाकाशशरीरिणां॥
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते॥१८॥आकाशात्मनामव्याप्यवृत्तिक्षणिकविशे
षगुणवत्वं॥आकाशस्य विशेषगुणः शब्दः॥स चाऽव्याप्यवृत्तिः॥यदा किंचिदवच्छेदे
न शब्द उत्पद्यते॥तदन्याऽवच्छेदेन तदभावस्यापि सत्वात्॥क्षणिकत्वं च तृतीयक्षणवृ ११
त्तिध्वंसप्रतियोगित्वं योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात्॥प्रथमशब्द

स्याद्द्वितीयशब्देननाशः॥ एवंज्ञानादीनामपि यदाज्ञानादिकमात्मनिशरीरावच्छेदे
नोत्पद्यतेतदन्याऽवच्छेदेनतदभावस्यसत्वात्॥ एवंज्ञानादिकमपिक्षणद्वयाऽवस्थायि
एवंवाऽव्याप्यवृत्तिविशेषगुणवत्वंक्षणिकविशेषगुणवत्वंवार्थः॥ पृथिव्यादौरूपादिवि
शेषगुणोऽस्तीत्यव्याप्यवृत्तीत्युक्तं॥ पृथिव्यादावव्याप्यवृत्तिःसंयोगादिरस्तीतिविशे
षगुणेत्युक्तं॥ ननुरूपादीनामपिकदाचित्तृतीयक्षणेनाशसंभवात्॥ क्षणिकविशेषगु
णवत्वंक्षित्यादावतिव्याप्तमितिवाच्यं॥ चतुःक्षणवृत्तिजात्यावृत्तिजातिमद्विशेषगुणवत्व
स्यतदर्थत्वात्॥ अपेक्षाबुद्धिःक्षणत्रयंतिष्ठति॥ क्षणचतुष्टयंतुनकिमपिज्ञानादिकं
तिष्ठति॥ रूपत्वादिकंतुक्षणचतुष्टयस्थायिन्यपिरूपादौवर्त्ततइतितद्व्युदासः॥ ईश्वर
ज्ञानस्यचतुःक्षणवृत्तित्वात्॥ ज्ञानत्वस्यतद्वृत्तित्वात्जन्येत्युक्तं॥ यदाऽकाशजीवात्मनोः

१२ साधर्म्यंतद्वज्जन्येतिनदेयंद्व्युणादिकमादायलक्षणस्यमव्याप्तेः॥परम
महतस्यतादृशगुणत्वाच्चतुर्थक्षणेद्वित्वादीनामपिनाशाऽभ्युपगमात्द्वि
त्वादीनामपितथात्वात्तद्वारणायविशेषेति॥त्रिक्षणवृत्तित्वंवाच्यं॥उक्तादि
कमादायात्मनिलक्षणसमन्वयात्॥रूपद्रव्यत्वप्रत्यक्षयोगिनःप्रथमाश्र
यः॥पृथिव्यप्तेजसांरूपवत्वंद्रवत्ववत्वंप्रत्यक्षविषयत्वंचेत्यर्थः॥ननुचक्षुः
रादीनांमर्जनकपालस्थवह्नेरूष्मणश्चरूपवत्वेकिंमानमितिवाच्यं॥तत्रा
पितेजस्त्वेनरूपानुमानात्॥एवंचव्याख्यानेतपृथिवीजलतेजोभागानामपि
पृथिवीत्वादिनारूपाऽनुमानंबोध्यं॥ननुघटादौद्रुतसुवर्णादिभिन्नेतेजसि
वद्रवत्ववत्वमव्याप्तमितिवाच्यं॥द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्यवि १२

वक्षितत्वात्॥ घृतजतुप्रभृतिषु द्रव्येषु पृथिवीजलेषूद्भूतसु वर्णादौ तेजसि व
द्रवत्वसत्त्वात्॥ तत्र पृथिवीत्वादिसत्त्वात् तदादाय सर्वत्र लक्षणसमन्वयः
नच प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तमतिव्याप्तं च रूपादाविति वाच्यं॥
चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ आ
त्मन्यतिव्याप्तिवारणाय चाक्षुषेति॥ गुरुणी द्वे रसवती गुरुत्ववत्त्वं रसव
त्त्वं च पृथिवीजलयोरित्यर्थः॥ नच घ्राणेन्द्रियादीनां वायानीतपार्थिवभागा
नां च रसादिमत्त्वे किं मानमिति वाच्यं॥ तत्रापि पृथिवीत्वादिना तदनुमानात्॥
द्वयोर्नैमित्तिको द्रवः पृथिवीतेजसोरित्यर्थः॥ नच नैमित्तिकद्रवत्वं घटादौ

१३ वन्ध्यादौ वाऽव्याप्तमिति वाच्यं॥ नैमित्तिकद्रवत्वसमानाऽधिकरणद्रव्यत्व
व्याप्यजातिमत्त्वस्य विवक्षितत्वात्॥ आत्मनो भूतवर्गेभ्यो विशेषगुणयोगि
नः॥ ॥पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः॥ यदुक्तं यस्य
साधर्म्यं वैधर्म्यमितरस्य तत्॥१९॥ ॥ज्ञेयत्वादिकं विहायेति बोध्यं॥ त
त्तु नकस्याऽपि वैधर्म्यं केवलाऽन्वयित्वात्॥ स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरु
तो गुणाः॥ स्पर्शादयोऽष्टौ रूपं वद्रवो वेगश्च तेजसि॥२०॥ स्पर्शादयोऽष्टौ वेगश्च द्रव
त्वं च गुरुत्वकं॥ रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश॥२१॥ ॥स्नेहहीना गंधयु तु
ताः क्षिताववेत चतुर्दश॥ बुध्यादिषट्कं संख्यादिपंचकं भावना तथा॥२२॥ ॥धर्मा
१३

ऽधर्मौ गुणा एते आत्मनश्च चतुर्दश॥ संख्यादिपंचकं कालदिशोः शब्दश्च ते च
खे॥ २३॥ संख्यादिपंचकं बुद्धिरिच्छा यत्नोपि चेश्वरे॥ परापरत्वे संख्यादिपंच
वेगश्च मानसे॥ २४॥ ते च संख्यादयः पंच खे॥ ॥साधर्म्यवैधर्म्ये निरूप्य
संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति॥ तत्र क्षितिरित्यादिना गंधहेतुरि
ति॥ गंधसमवायिकारणमित्यर्थः॥ यद्यपि गंधवत्वमात्रं पृथिव्याः लक्षणमु
चितं॥ तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं॥ तथा
हि॥ पृथिवीत्वं हि गंधसमवायिकारणतावच्छेदकतया सिद्ध्यति॥ अन्यथा गं
धतावच्छिन्नस्याऽकस्मिकतापत्तेः॥ न च पाषाणादौ गंधाऽभावात् गंधव

१४ त्वमव्याप्तमितिवाच्यं॥तत्रापिगंधसत्वात्॥अनुपलब्धिस्तु अनुत्कटत्वेनाप्युप
पद्यते॥कथमन्यथा तद्भस्मनि गंधउपलभ्यते॥भस्मनो हि पाषाणध्वंसजन्य
त्वात्पाषाणोपादानोपा॥देयत्वं सिध्यति॥यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तद्द्रव्यं त
दुपादानोपादेयमिति व्याप्तेः॥दृष्टं चैतत्॥खंडपटे महापटध्वंसजन्ये॥ए
वं च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वं॥
तथा च तस्यापि गंधवत्वे बाधकाऽभावः॥नानारूपवती मता॥२५॥शुक्लनीला
दिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्त्तते॥न तु जलादौ॥तत्र शुक्लस्यैव स
त्वात्॥पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात्॥न च य १५

त्वनानारूपं नोत्पन्नं तत्राव्याप्तिः॥ रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्या
रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात्॥ वैशेषिकनये पृथिवी
परमाणौ रूपनाशस्य रूपांतरस्य च सत्त्वात्॥ न्यायनये घटादावपि तत्सत्त्वात् लक्षण
स्य समन्वयः॥ षड्विधस्तु रसस्तत्र॥ मधुरकटुकषायादिभेदेन यः षड्विधो रस
स पृथिव्यामेव॥ जले तु मधुर एव रसः॥ अत्रापि पूर्ववत्॥ रसद्वयवद्वृत्तिद्रव्य
त्वव्याप्यजातिमत्त्वलक्षणार्थो अवसेयः॥ गंधस्तु द्विविधो मतः॥ द्विविध इति व
स्तुस्थितिमात्रं॥ न तु द्विविधगंधवत्त्वमपि लक्षणं॥ द्विविधत्वस्य व्यर्थत्वात्॥ द्वैवि
ध्यं च सौरभाऽसौरभभेदेन बोध्यं॥ स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपा
कजः॥ ॥तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्तत इत्यत उक्तं।

१५ पाकज इति॥ इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तं॥ पाकजस्पर्शवत्वमात्रं
लक्षणं॥ अधिकस्यैव व्यावर्त्यत्वात्॥ यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्प
र्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वमर्थो बोध्यः॥ नित्याऽनित्याभेदाद्द्वैधा नित्या स्यादणु
लक्षणा॥ अनित्या तु तदन्या स्यात्सैवावयवयोगिनी॥ ॥सा पृथिवी द्विधा॥ नित्याऽनि
त्या चेत्यर्थः॥ अणुलक्षणा परमाणुरूपा पृथिवी नित्या॥ तदन्या परमाणुभिन्ना पृथिवी
द्व्यणुकादि सर्वाप्यनित्येत्यर्थः॥ सैव अनित्या पृथिव्येव अवयववतीत्यर्थः॥ ननु अवयवि
नि किं मानं॥ परमाणुपुंज एवोपपत्तेः॥ न च परमाणूनामतीन्द्रियत्वाद्घटादेः प्रत्यक्षत्वं
न स्यादिति वाच्यं॥ एकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वसंभवात्॥ य
थैकस्य केशस्य दूरे अप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वं॥ न चैकः स्थूलो घट इति प्रत्य

१५

क्षबुद्धेरनुपपत्तेरिति वाच्यं॥ एको महानुर्धान्यराशिरितिवत्तदुपपत्तेः॥ मैवं॥ परमाणो
रतींद्रियत्वेन तत्समूहस्यापि प्रत्यक्षताऽयोगात्॥ दूरस्थकेशस्तंबातींद्रियः संनिधा
नेतस्यैव प्रत्यक्षत्वात्॥ न चैतदानीं द्रव्यपरमाणुपुंजस्योत्पन्नत्वान्नप्रत्यक्षत्वविरोध
इति वाच्यं॥ अद्रव्यस्य द्रव्याऽनुपादानत्वात्॥ अन्यथा वस्त्ररूपाद्यादिसंततौ कदा
चिद्द्रव्यत्वप्रसंगात्॥ न चातितप्ततैलादौ कथमद्रव्यदहनसंततेर्द्रव्यदहनोत्प
त्तिरिति वाच्यं॥ तत्र तदंतःपातिभिर्द्रव्यदहनाऽवयवैः स्थूलदहनोत्पत्तेरभ्युपग
मात्॥ न चाद्रव्येन द्व्यणुकेन कथं द्रव्यत्रसरेणोरुत्पत्तिरिति वाच्यं॥ यतो नवयं द्र
व्यत्वमद्रव्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे॥ परंतु महत्त्वोद्भूतरूपादिकारणसमु
दायवशाद्द्रव्यत्वं॥ तदभावे चाद्रव्यत्वं तथा च त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वं॥ न तु द्व्यणुक

१६ देस्तदभावात्॥ नहितन्मतेऽपीदं संभवति॥ परमाणौ महत्त्वाऽभावात्॥ इत्थं चाऽवय
विसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षासिद्धत्वादनित्यत्वं॥ तेषां चाऽवयवावयवधाराया
अनंतत्वे मेरुसर्षपयोरपितुल्यत्वप्रसंगः॥ अतः क्वचिद्विश्रामो वाच्यः॥ यत्र तु विश्रा
मस्तस्याऽनित्यत्वे असमवेतकार्योत्पत्तिप्रसंगात्॥ तस्य नित्यत्वं॥ महत्परिमाण
तारतम्यस्य गगनादौ विश्रांतत्वमिव अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रां
तत्वमस्तीति तस्य परमाणुत्वसिद्धिः॥ न च त्रसरेणावेव विश्रामोस्त्विति वाच्यं॥ त्र
सरेणुः सावयवश्चाक्षुषद्रव्यत्वाद्घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरव
यवास्सावयवा महदवयवत्वात्कपालवदित्यनुमानेन तदवयवसिद्धिः॥ न च दम
प्रयोजकं॥ अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्वस्य प्रयोजकत्वात्॥ न चैवं क्रमेण तदव १६

यवाऽवयवधारापिसिद्धेदितिवाच्यं॥अनवस्थाभयेनतदसिद्धेरिति॥साचत्रिधाभवे
द्देहइंद्रियेविषयस्तथा॥साकार्यरूपापृथिवीत्रेधा॥॥शरीरेंद्रियविषयभेदादित्यर्थः॥
तत्रदेहमुदाहरति॥योनिजादिभवेद्देहः॥योनिजमयोनिजंचेत्यर्थः॥योनिजमपिद्वि
विधा॥जरायुजमंडजंचेति॥जरायुजंमनुष्यादीनां॥अंडजंसर्पादीनां॥अयोनिजं
स्वेदजोद्भिज्जादिकं॥स्वेदजाःक्रिमिदंशाद्याः॥उद्भिज्जास्तरुगुल्माद्याः॥नारकी
णांशरीरमयोनिजं॥नचमानुषादीनांशरीराणांपार्थिवत्वेकिंमानमितिवाच्यं॥गंधादि
मत्तस्यैवप्रमाणत्वात्॥नचक्लेदोष्मादेरुपलंभादाप्यत्वादिकमपिस्यादितिवाच्यं॥त
थासतिजलत्वपृथिवीत्वादीनांसंस्कारप्रसंगात्॥नचतर्हिजलत्वादिकमेवास्तुनतु
पार्थिवत्वादिकमितिवाच्यं॥क्लेदादीनांविनाशेपिशरीरत्वेनप्रत्यभिज्ञानात्॥गंधाद्यु

१७ पलब्धेश्च पृथिवीत्वसिद्धेः॥ तेन पार्थिवत्वादि शरीरे जलादीनां निमित्तत्वमात्रं बोध्यं॥ शरी
रत्वं तु न जातिः पृथिवीत्वादीनां सांकर्यात्॥ किं तु चेष्टाश्रयत्वं॥ वृक्षादीनामपि चेष्टाश्रयत्वा
न्नाव्याप्तिः॥ न च वृक्षादेः शरीरत्वे किं मानमिति वाच्यं॥ आध्यात्मिकवायुसंबंधस्य प्रमा
णत्वात्॥ तत्रैव किं मानमिति चेत्॥ भग्नक्षतसंरोहणादिना तदुन्नयनात्॥ यदि हस्तादेः
शरीरव्यवहारो न भवति॥ तदांत्यावयवित्वेन विशेषणीयं॥ न चैवं चैत्रशरीरे चेष्टानुजाता
तत्राव्याप्तिरिति वाच्यं॥ तादृशे प्रमाणाऽभावात्॥ अथवा चेष्टावदंत्यावयविवृत्तिद्रव्यत्व
व्याप्यजातिमत्त्वं तन्मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः॥ न च नृसिंह
शरीरे तु कथमेतल्लक्षणसमन्वयः॥ तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाऽ
तथा भावात्॥ जलीयतैजसशरीरवृत्तित्वेन तस्यापि जातित्वाऽभावादिति वाच्यं॥ कल्पभेदे
न नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्॥ इंद्रियं घ्राणलक्ष १७

णां॥ घ्राणेंद्रियं पार्थिवमित्यर्थः॥ पार्थिवत्वं कथमिति चेत्॥ इत्थं घ्राणेंद्रियं पार्थिवं॥ रूपादिषु पंच
स्कमध्ये गंधस्यैव व्यंजकत्वात्॥ कुंकुमगंधाभिव्यंजकघृतादिवत्॥ न च दृष्टांते स्वीयरू
पादिव्यंजकत्वादसिद्धिरिति वाच्यं॥ परकीयरूपादि अव्यंजकत्वस्य तदर्थकत्वात्॥
न च नवशरावगंधव्यंजकजलेनैकांतिकमिति वाच्यं॥ तस्य — तुरसाभिव्यंजकत्वात्
यद्वा परकीयेति न देयं॥ वायूपनीतसुरभिभागस्य दृष्टांतत्वसंभवात्॥ न च घ्राणेंद्रियसं
निकर्षस्य गंधमात्रव्यंजकत्वात्॥ तत्र व्यभिचार इति वाच्यं॥ द्रव्यत्वे सतीति विशेषणात्॥ विष
यो द्व्यणुकादिब्रह्मांडांत उदाहृतः॥ ॥उपभोगसाधनं हि विषयः॥ सर्वमेव हि कार्यं ज्ञा
तमदृष्टाऽधीनं च यत्र कार्ये यददृष्टाधीनं तत्तदुपभोगं साक्षात्परंपराया वा जनयत्ये
व॥ न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति॥ तेन द्व्यणुकादिकं ब्रह्मांडांतं सर्वमे
व विषयो भवति॥ शरीरेंद्रिययोर्विषयेऽपि प्रकारांतरेणोपन्यासः॥ शिष्यबुद्धिवैशद्या

१८ र्थः॥ जलं निरूपयति॥ ॥ वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ॥ स्नेहसमवायिकारणतावच्
छेदकतया जलत्वजातिः सिध्यति॥ यद्यपि स्नेहत्वं नित्याऽनित्यवृत्तितया न कार्यताऽवच्छेदकं
तथापि जन्यस्नेहत्वं तथा बोध्यं॥ अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाऽभावात्॥ तस्य वा नि
त्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति चेन्न॥ जन्यस्नेहजनकतावच्छेदकतया ज
न्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकताऽवच्छेदकतया जलत्वजातिसिद्धेः॥ शुक्लरूपमेव
जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति॥ न तु शुक्लरूपवत्त्वं लक्षणं॥ अथ वा नै- मित्तिकद्रव
त्ववद्वृत्ति रूपवद्वृत्ति द्रव्यत्वसाक्षात्व्याप्यजातिमत्त्वं वा तदर्थः॥ रसस्पर्शौ जले मधुरशीत
लौ॥ जलस्य मधुर एव रसः॥ शीत एव स्पर्शः॥ तिक्तवद्वृत्ति मधुरवद्वृत्ति द्रव्यत्वसाक्षाद्व्या
प्यजातिमत्त्वं शीतेतरस्पर्शवद्वृत्ति शीतस्पर्शवद्वृत्ति जातिमत्त्वं वा तदर्थः॥ ननु शुक्लरूपमे
वेति कुतः कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न॥ नीलजनकतावच्छेदिकायाः पृथिवीत १८

जातिरभावात्॥ जले नीलरूपाऽसंभवात्॥ कालिंदीजले नीलप्रतीतिरत्वाश्रयोपाधिकी॥ अतएव
वियति विक्षिप्ते धवलिमोपलब्धिः॥ अथ जले माधुर्ये किं मानं॥ न हि प्रत्यक्षेण कोपि रसस्तत्राऽनु
भूयते॥ न च नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं तस्याश्रयोपाधिकत्वात्॥ अन्यथा
जंबीरकरवीरसादावाम्लरसोपलब्धेराम्लादिमत्त्वमपि स्यादिति चेन्न॥ हरीतक्यादिभक्षणस्य
२ जलस्य व्यंजकत्वात्॥ न च हरीतक्यामेव जलोष्मसंयोगाद्रसांतरोत्पत्तिरिति वाच्यं कल्पनागौर
वात्॥ पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकं॥ जंबीररसादौ त्वाश्रयोपाधि
की तथा प्रतीतिः॥ एवं जलस्य शीतस्पर्शजनकतावच्छेदकं जलत्वं जन्ये जलत्वं वा बोध्यं॥ पृ
वंदनाऽदौ तु शैत्योपलब्धिश्चंदनांतरवर्तिशीततरसलिलस्य तेजस्संयोगाज्जले औष्ण्यप्र
प्रतीतिराश्रयोपाधिकी स्फुटैव॥ तत्र पाकाऽसंभवात्॥ स्नेहस्तत्रेति॥ घृतादावपि तदंतर्व
र्ति जलस्यैव स्नेहः॥ जलस्य स्नेहसमवायिकारणत्वात्॥ तेन जल एव स्नेह इति मंतव्यं॥ द्र

१९

वत्वं तु सांसिद्धिकमुदाहृतं॥ सांसिद्धिकद्रवत्वत्वं जातिविशेषः॥ प्रत्यक्षसिद्धः॥ तदवच्छिन्नं जलत्वेनैताव
च्छेदकमपि तदेवेति भावः॥ तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति व
क्ष्यते॥ नित्यतादि प्रथमवत्॥ पृथिव्या इवेत्यर्थः॥ तथाहि॥ जलं द्विविधं॥ नित्यमनित्यं च॥ परमाणु
रूपं नित्यं॥ द्व्यणुकादिकं सर्वमनित्यं॥ अवयवसमवेतत्वं वा॥ अनित्यमपि त्रिविधं॥ शरीरेंद्रियविषय
भेदात्॥ किंतु पृथिवीतो यो विशेषस्तमाह॥ किंतु देहमयोनिजं॥ अयोनिजमेवेत्यर्थः॥ जलीयं श
रीरमयोनिजं वरुणलोके प्रसिद्धमिति॥ इंद्रियं रसनं॥ जलीयमित्यर्थः॥ तथाहि॥ रसनं जली
यं गंधाव्यंजकत्वेति रसव्यंजकत्वात्॥ रसाभिव्यंजकोदकवत्॥ रसनेंद्रियसंनिकर्षव्यभि
चारवारणाय द्रव्यत्वं देयं॥ विषयं दर्शयति॥ सिंधुर्हिमादिर्विषयो मतः॥ सिंधुः समुद्रः हि
मं तुषारः॥ आदिपदात्सरित्कासारकादिः॥ सर्वोपि ग्राह्यः॥ न च हिमकरकयोः॥ काठिन्यत्वा
त्पार्थिवत्वमिति वाच्यं उष्मणा विलीनयोस्तयोर्जलत्वस्य प्रत्यक्षसिद्धत्वात्॥ यद्द्रव्यं यद्द्रव्यध्वंस १९

जन्यमिति व्याप्तेः जलोपादानोपादेयत्वसिद्धेः॥ अदृष्टविशेषेण द्रवत्वप्रतिरोधात्॥ करकायां का
ठिण्यप्रतीतेर्भ्रांतित्वात्॥ तेजो निरूपयति॥ स्पर्श उष्णस्तेजसस्तु॥ उष्णत्वं स्पर्शनिष्ठो जाति
विशेषः॥ प्रत्यक्षसिद्धः॥ इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिवि
शेषः॥ तस्याः परमाणुवृत्तित्वं तु जलत्वस्येवानुसंधेयं॥ न चोष्णस्पर्शवत्त्वं चंद्रकिरणादावव्या
प्तमिति वाच्यं॥ तत्राप्युष्णस्य सत्वात्॥ किंतु तदंतःपातिजलस्पर्शेनाभिभवात्तदग्रहः॥
एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ अनुद्भूतत्वाच्च तदग्रहः॥ रूपं च शु
क्लभास्वरं॥ वैश्वानरमरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छुक्लरूपाग्रहः॥ त
द्रूपाग्रहे धर्मिणोपि चाक्षुषत्वं न स्यादिति चेन्न॥ अन्यदीयरूपेणैव धर्मिणोपि ग्रहसंभ
वात्॥ शंखस्य च पित्तपीतिमा॥ वह्नेस्तु शुक्लरूपं नाभिभूतं॥ किंतु तदीयं शुक्लत्वम
भिभूतमित्यन्ये नैमित्तिकमिति॥ द्रवत्वं तु सुवर्णादिरूपे तेजसि तत्सत्वात्॥ न चैनैमित्ति

२८ कद्रवत्वलक्षणं दहनादावव्याप्तं घृतादावतिव्याप्तं चेति वाच्यं पृथिव्यवृत्तिनैमित्तिकद्रवत्व
वद्वृत्तिजातिमत्त्वस्य विवक्षितत्वात्॥ नित्यतादिकं पूर्ववत्॥ जलस्येवेत्यर्थः॥ तथाहि॥ तद्द्विवि
धं॥ नित्यमनित्यं च॥ परमाणुरूपं नित्यं॥ तदन्यदनित्यं॥ अवयविव॥ तच्च त्रेधा॥ शरीरेन्द्रिय
विषयभेदादित्यर्थः॥ शरीरमयोनिजमेवेति॥ तच्च सूर्यलोकादौ प्रसिद्धं॥ अवयवो विशे
षस्तमाह॥ इंद्रियं नयनं॥ वह्नेस्तेजसं परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरू
पव्यंजकत्वात् प्रदीपवत्॥ प्रदीपस्य स्वीयस्पर्शव्यंजकत्वादाद्यं परकीयेति॥ मण्यादेः स्वी
यरूपव्यंजकत्वाद्व्यभिचारवारणाय द्वितीयं परकीयं चेति॥ अथवा प्रजायाः दृष्टांतत्वसंभ
वादाद्यं परकीयं न देयं॥ वह्नेः सन्निकर्षव्यभिचारवारणाय द्रव्यत्वं देयं॥ विषयं दर्शयति॥ व
ह्निस्वर्णादिर्विषयो मतः॥ ननु सुवर्णस्य तैजसत्वे किं मानमिति चेत्॥ स्वर्णं तैजसं अ
सति प्रतिबंधके अत्यंतानलसंयोगेप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं य
था पृथिवी॥ न वा प्रयोजकं पृथिवीद्रवत्वस्याग्निसंयोगनाश्यत्वात् ननु पीतिमगुरुत्वाश्रय २०
स्य पार्थिव ८

स्यापि तदानींद्भूतत्वात्तेन व्यभिचार इति चेन्न ॥ जलमध्यस्थमसीक्षोदवत्तस्याप्यद्भवत्वात् ॥
अपरे तु पीतिमाश्रयस्यात्यंताग्निसंयोगेपि रूपापरावृत्तिदर्शनात्तत्प्रतिबंधकं विजाती
यद्रव्यं कल्प्यते ॥ तथाहि ॥ अग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधक
द्रवद्रव्यसंयुक्तः ॥ अत्यंताग्निसंयोगेपि पूर्वरूपविजातीयरूपानधिकरणत्वात् ॥ त
प्तजलमध्यस्थपीतपटवत् ॥ तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् ॥ वायु
निरूपयति ॥ अपाकजोनुष्णाशीतस्पर्शस्तु पवनो मतः ॥ तिर्यग्गमनवानेष ज्ञेयः
स्पर्शादिलिंगकः ॥ अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्वादुक्तमपाकज इति ॥ अपा
कजस्पर्शस्य जलादावपि सत्वादुक्तमनुष्णाशीत इति ॥ एतेन वायवीयो विजातीयः स्प
र्शो दर्शितः ॥ तज्जनकतावच्छेदकं वायुत्वमिति भाव ॥ एष वायुः स्पर्शादिलिंगकः ॥

वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते॥ विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या
शाखादीनां कंपेन च वायोरनुमानात्॥ यथा न वायुः प्रत्यक्षस्तथाग्रे वक्ष्यते॥ पूर्ववन्नित्य
ताद्युक्तं॥ वायुर्द्विविधो नित्योऽनित्यश्च॥ परमाणुरूपो नित्यः॥ तदन्योऽनित्यः समवे
तश्च॥ सोपि त्रिविधः॥ शरीरेंद्रियविषयभेदात्॥ तत्र शरीरमयोनिजं पिशाचादीनां
॥ परंतु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टंभादुपभोगक्ष
मत्वं॥ जलादीनां प्राधान्याज्जलीयत्वादिकमेवेति॥ अत्र यो विशेषस्तमाह॥ देहव्यापीत्व
गिंद्रियं॥ शरीरव्यापकं स्पर्शग्राहकमिंद्रियं त्वक्॥ तच्च वायवीयं रूपादिषु पंचसु मध्ये
स्पर्शस्यैव व्यंजकत्वात्॥ अंगसंगिसलिलशैत्यव्यंजकव्यंजनवायुवत्॥ त्वक्संनि
कर्षे व्यभिचारवारणाय द्रव्यत्वं विशेषणीयं॥ विषयं दर्शयति॥ प्राणादिस्तु म २१

महावायुपर्यंतो विषयो मतः ॥ यद्यप्यनित्यो वायुश्चतुर्विधः ॥ तस्य देहस्थिप्राणापानादि
रिति कमाकरे ॥ तथाप्यत्र तं त्रैविध्यमुक्तं ॥ प्राणस्त्वेक एव हृदादिनानास्थानवशान्मु
खनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभते ॥ आकाशं निरूपयति ॥ आकाशस्तु
विज्ञेयः शब्दो वैशेषिको गुणः ॥ आकाशकालदिशामेकैकत्वादाकाशत्वा
दिकं न जातिः ॥ आकाशत्वं शब्दाश्रयत्वं ॥ वैशेषिक इति कथनं तु विशेषगुणांतरा
व्यवच्छेदाय ॥ एतेन प्रमाणमपि दर्शितं ॥ तथाहि ॥ शब्दो गुणश्चक्षुर्ग्रहणायोग्यब
हिरिंद्रियग्राह्यजातिमत्वात् स्पर्शवत् ॥ शब्दो द्रव्यसमवेतो गुणत्वात्तनुमाने दि
न शब्दस्य द्रव्यसमवेतत्वे सिद्धे ॥ शब्दो न स्पर्शवद्विशेषगुणः ॥ अग्निसंयोगासमवायि
कारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् ॥ सुखवत् ॥ पाकजरूपादे

शा

सि॰मु॰ २२

व्यभिचारणायसत्यंतं॥पटरूपादौव्यभिचारणायअकारणगुणपूर्वकं॥जलपरमाणुरूपा
दौव्यभिचारवारवारणायप्रत्यक्षेति॥शब्दःनदिक्कालमनोगुणो विशेषगुणत्वात्॥ना
त्मविशेषगुणोबाह्येंद्रियग्राह्यत्वात्॥रूपवत्॥इत्थंचाष्टाधिकरणंनवमंद्रव्यमाग
नमोनामकंसिध्यतीति॥नन्वाय्ववयवेषुसूक्ष्मशब्दक्रमेणवायौकारणगुणपूर्व
कशब्दःउत्पद्यतामितिवाच्यं॥अयावद्द्रव्यभावित्वेनवायुविशेषगुणत्वाभावात्॥तत्रच
शरीरस्यविषयस्यवाबाह्येंद्रियंदर्शयति॥इंद्रियंतुनवेतरश्रोत्रंतत्राकाशंलाघवा
देकंसिद्धं॥श्रोत्रंपुरुषभेदेभिन्नंकथमाकाशंस्यादतआह॥एकःसन्नप्युपाधित
॥आकाशएकःसन्नपिउपाधेःकर्णशष्कुल्यादिभेदाद्भिन्नं॥श्रोत्रात्मकंभवतीत्यर्थः २२
कालंनिरूपयति॥जन्यानांजनकःकालः॥तत्रप्रमाणंदर्शयितुमाह॥जगतामाश्रयोमतः॥
न

॥तथाहि॥इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पंदादिकं यदा विषयीकरोति तदा सूर्यपरिस्पंदादिना
घटादेः संबंधो वाच्यः॥स च संयोगादिर्न भवतीति काल एव संबंधघटकः कल्प्यते॥इत्थं च॥त
स्याश्रयत्वमेव सम्यक्॥प्रमाणंतरं वदन्॥परापरत्वधीहेतुः॥परत्वादिबुद्धेरसाधारणनि
मित्तं काल एव॥परत्वापरत्वयोरसमवायिकारणं संयोगाश्रयलाघवादतिरिक्तः कल्प्य
त इति भावः॥नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आ
ह॥क्षणादिः स्यादुपाधितः॥कालस्त्वेकोपि उपाधिभेदात् क्षणादिव्यवहारविषयः॥उ
पाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म॥पूर्वसंयोगावच्छिन्नविभागो वा॥पूर्वसंयोग
नाशावच्छिन्नोत्तरसंयोगप्रागभावो वा॥उत्तरसंयोगावच्छिन्नं कर्म वा॥न चोत्तरसंयोगा
नंतरं क्षणव्यवहारो न स्यादिति वाच्यं॥कर्मांतरसत्वादिति॥महाप्रलये क्षणादिव्यवहारो

सि॰मु॰
२३
र

यद्यस्ति तदा अनाश्रयत्वाद्ध्वंसेनैवोपपादनीय इति भावः॥ दिशं निरूपयति॥ दूरान्तिकादिधीहेतु
रेका नित्या दिगुच्यते॥ दूरत्वमन्तिकत्वं च दैशिकं परत्वमपरत्वं च बोध्यं॥ तद्धेतुरसाधारणं॥
दिगेवैदैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया दिक् सिध्यतीति भावः॥
ननु एकैव दिग्यदि तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतामत आह॥ उपाधिभे
दादेकापि प्राच्यादिव्यपदेशभाक्॥ यत्तु पुरुषस्योदयगिरिसंनिहिता या दिक् तदवच्छिन्न
त्पुरुषस्य सा प्राची॥ एवमुदयगिरिव्यवहिता च प्रतीची॥ एवं तत्पुरुषीयसुमेरुसन्निहि
ता दिगुदीची तद्व्यवहिता त्ववाची॥ सर्वेषामेव वर्षाणां मेरुरुत्तरसंस्थित इति नियमात्॥
आत्मानं निरूपयति॥ आत्मेन्द्रियाद्यधिष्ठाता॥ आत्मत्वजातिः सुखदुःखादिसमवा
यिकारणतावच्छेदकतया सिध्यति॥ ईश्वरेऽपि सा जातिरस्त्यदृष्टादिरूपकारणाभावा २३

सु

न्त सुखदुःखाद्युत्पत्तिः॥ नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावइत्यस्याः प्रयोजकत्वात्॥ परे तु ई
श्वरे साज्ञातिर्नास्त्येव॥ प्रमाणाभावात्॥ नच दृष्टमदृष्टव्यत्वापत्तिः॥ ज्ञानवत्वेन विभजनेनाद्विसा
ङः॥ अधिष्ठाता॥ इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः॥ यद्यप्यात्मनि अहंज्ञा
ने अहं सुखीत्यादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरा
ति दिभिन्नस्तत्प्रतीगोचरइति प्रतिपादयितुं न कोपि शक्यत इत्यतः प्रमाणं दर्शयति॥ करणं
हि सकर्तृकं॥ वास्यादीनां छिदादिकरणानां कर्तारमंतरेण फलानुपधानं दृष्टं॥ एवंच
क्षुरादीनां ज्ञानकरणानां फलोपधानमपि न कर्तारमंतरेणोपपद्यत इति अतिरिक्त
ः कर्ता कल्प्यते॥ ननु शरीरस्यैव कर्तृत्वमस्तु अत आह॥ शरीरस्य न चैतन्यं मृतेषु व्यभिचा
रतः॥ ननु चैतन्यं ज्ञानादिकमेव॥ सुषुप्तकालेनोत्पन्नमतइव मृतशरीराणामपि तदभावेका

सि॰मु॰ क्षतिः ॥ प्राणनाशेन ज्ञानाद्यनाशस्य सिद्धिरिति चेन्न ॥ शरीरस्य चैतन्ये बाल्यविलोकितस्य स्थवि
२४ ११ रे स्मरणानुपपत्तेः ॥ शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् ॥ न च पूर्वशरीर
रोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पाद्यत इति वाच्यं ॥ अनेकसंस्कारकल्पनागौर
वात् ॥ एवं शरीरस्य चैतन्ये बालकस्य स्तनपाने प्रवृत्तिर्न स्यात् ॥ इष्टसाधनताज्ञानस्य
तद्धेतुत्वात् ॥ तदानीमिष्टसाधनत्वानुमापकाभावात् ॥ मन्मते तु जन्मान्तरानुभूतेष्टसा
धनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः ॥ न च जन्मान्तरानुभूतमन्यदपि स्मर्यतेति वाच्यं ॥ उ
द्बोधकाभावात् ॥ अत्र तु नायत्यां जीवनादृष्टमेवोद्बोधकं कल्प्यते ॥ इत्थं च संसारस्या
नादितया ऽऽत्मनोऽनादित्वसिद्धौ वनादिभावस्य नाशासंभवान्नित्यत्वं संभवतीति बोध्यं ॥
ननु चक्षुरादीनां ज्ञानादिकरणत्वं कर्तृत्वं चास्तु विरोधे बाधकाभावादत आह ॥ तथात्वे च २४

इंद्रियाणामुपघाते॥ तथात्वं चैतन्यं उपघाते नाशे सति॥ अर्थाच्चक्षुरादीनामेव॥ कथं स्मृतिं॥
पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात्॥ अनुभवितुरभावादन्यस्यानुभूत
स्यान्येन [illegible] स्मरणासंभवात् अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति ए
भावः॥ ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह॥ मनोऽपि न तथा
[illegible] ज्ञाना[illegible]द्यनध्यक्षं तत्र भवेत्॥ मनसोऽणुत्वात्प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मनसि
ज्ञानसुखादिसत्त्वेन तत्प्रत्यक्षानुपपत्तेरित्यर्थः॥ यथा च मनसोऽणुत्वं तथा अग्रे वक्ष्यते॥
नन्वस्तु विज्ञानमेवात्मा॥ तस्य स्वतःप्रकाशरूपत्वाच्चेतनत्वं ज्ञानसुखादिकं तस्यैवाकार
विशेषः॥ तस्यापि भावत्वादेव क्षणिकत्वं॥ पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानहेतुत्वात्॥
सुषुप्तावप्यालयविज्ञानधारा निराबाधैव॥ मृगमदवासनायावसनमिव पूर्वपूर्वविज्ञान

सि॰मु॰ जनितसंस्कारारणमुत्तरोत्तरविज्ञानेसंक्रांतत्वान्नानुपपत्तिःस्मरणादेरितिचेत्॥तस्यजगद्वि
२५ वि षयत्वेसार्वज्ञापत्तेर्यत्किंचिद्विषयत्वेनियामकाभावात्सुषुप्तावपिविषयावभासप्रसंगा
त्॥तर्हिनीनिराकाराचित्संततिरनुवर्त्ततइतिचेन्न॥तस्यस्वप्रकाशत्वेप्रमाणाभावा
त्॥अन्यथाघटादीनामपिज्ञानत्वापत्तेः॥नचइष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनो
नोवादितिवाच्यं॥घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्॥आका[illegible]विशेषए र
वायंविज्ञानस्येतिचेत्॥किमयमाकारोतिरिच्यतेविज्ञानात्तर्हिसमायातंविज्ञानव्यति
ना रिक्तेनात्मनाँतिरिच्यतेचेत्तर्हिसमूहालंबनेनीलाकारोपिपीताकारःस्यात्॥स्वरूप
तोविज्ञानस्याविशेषात्॥अपोहरूपोनीलत्वादिविज्ञानधर्मइतिचेन्न॥नीलत्वादीनांवि २५
रुद्धानामेकस्मिन्नसमावेशात्॥इतरथाविरोधावधारणस्यैवदुरुपपादत्वात्॥

व

न वा वासनासंक्रमः संभवति ॥ मातृपुत्रयोरपि वासनासंक्रमप्रसंगात् ॥ न चोपादानोपादेय
भावो नियामक इति वाच्यं ॥ वासनायाः संक्रमासंभवात् ॥ उत्तरस्मिंस्तूत्पत्तिरेव संक्रम इति चे
न्न ॥ तदुत्पादकाभावात् ॥ विज्ञानस्यैवोत्पादकत्वे तदानंत्यप्रसंगः ॥ क्षणिकविज्ञानेष्वति
शयविशेषः कल्प्यत इति चेन्न ॥ मानाभावात् ॥ कल्पनागौरवाच्च ॥ एतेन क्षणिकशरीरेष्वेव चै
तन्यमपि प्रत्युक्तं ॥ गौरवादतिशये मानाभावाच्च ॥ बीजादावपि सहकारिसमवधानासमवधा
नाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनात् ॥ अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमे
वात्मा ॥ अविनाशी वा अरेयमात्मा ॥ सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतेरिति चेन्न ॥ तस्य सविष
यत्वासंभवस्य दर्शितत्वान्निर्विषयस्य ज्ञानत्वे मानाभावात्सविषयस्याप्यननुभवादतो
ज्ञानभिन्नो नित्य आत्मेति सिद्धं ॥ सत्यं ज्ञानमिति ब्रह्मपरं जीवेषु नोपयुज्यते ॥ ज्ञानाश्रा

नसुखित्वादिभिर्जीवानांभेदःसिद्धोस्तुतरामीश्वरभेदः अन्यथाबंधमोक्षानुपपत्तेः॥योपीश्वराभेदबो
धकोवेदःसोपितद्भेदेनतदीयत्वंप्रतिपादयन्नेवहि॥अभेदभावनयैवयतितव्यमितिवदति
॥अतएवसर्वेष्वात्मानःसमर्पिताइतिश्रूयते॥मोक्षदशायामज्ञाननिवृत्तावभेदोजायतइत्य
पिन॥भेदस्यनित्यत्वेननाशायोगात्॥भेदनाशेपिव्यक्तिद्वयंतिष्ठत्येव॥नचद्वित्वमपिनश्यती
तिवाच्यं॥तत्वनिर्धर्मकेब्रह्मणिसत्यत्वाभावेपिसत्यस्वरूपेतद्वित्वाद्वित्वाभावेपिद्व्यात्मको
ताविति सुवचत्वात्॥मिथ्यात्वाभावोधिकरणात्मकस्तत्रसत्यत्वमितिचेत्॥एकत्वेवोभय भा॰टी॰
क्तिद्वयात्मकोद्वित्वमित्यप्युच्यतांप्रत्येकमेकत्वेपिद्वयोरजयोर्नैव इतिवृन्दनयेनैकमित्यस्य
सर्वजनसिद्धत्वात्॥योपितदानीमभेदप्रतिपादकआगमःसोपिनिर्दुःखत्वादिनासाम्यंप्रति
पादयति॥संपदैश्वर्येकोडरोहितोयंराजासहत्र इतिवत्॥अतएवनिरंजनःपरमंसाम्यमुपै २६

सि वी गं

तीति श्रूयते ॥ इश्वरोपि न ज्ञानसुखात्मा ॥ किंतु ज्ञानाद्याश्रयो नित्यं विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञान
पदेन ज्ञानाश्रय एवोक्तः यः सर्ववित् इत्याद्यनुरोधात् ॥ आनंदमित्यस्याप्यानंदवदित्यर्थः ॥ आनं
प दोपि दुःखाभावेउपचर्यते ॥ नाराद्यंगमे सुखी संवृत्तोहमितिवत् ॥ अस्तु वा तस्मिन्नानंदेन
त्वसावानंदः ॥ असुखमिति श्रूते ॥ न विद्यते सुखं यस्येति [illegible]ोनार्थ इति चेन्न ॥ क्लिष्टकल्प ना
पत्ते ॥ आनंदमित्यत्र मत्वर्थीयाच् प्रत्ययविरोधादिति संक्षेपः ॥ एतेन प्रकृतिः कर्त्री पुरुषः
पुष्करपलाशवन्निर्लेपः किंतु चेतनः ॥ कार्यकारणयोरभेदात् कार्यनाशे सति कार्यत्वेति कार्यत्व
पतया नाशेन स्यादित्यकारणत्वं तस्य ॥ बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पने ॥ बु
प द्धिश्च प्रकृतेः परिणामः ॥ सैव महत्तत्वमंतःकरणमित्युच्यते ॥ तत्सत्वासत्वाभ्यां पुरुषस्य संसा
रापवर्गौ ॥ तस्मा एवं इंद्रियप्रणालिकया परिणति ज्ञानरूपा घटादिना संबंधः ॥ पुरुषे कर्तृ

सि.मु.
२७

त्वाभिमानो बुद्धेश्चैतन्याभिमानश्चानेनाग्रहः ॥ ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्व
च्छतया तत्प्रतिबिम्बाहतात्विकः ॥ दर्पणस्येव मुखोपरागः ॥ इदमिति विषयोपरागः इंद्रियप्रणा
लिकया परिणतिर्नेदृशस्तात्विकः ॥ निश्चयासाभिव्यक्तः दर्पणस्येव मलिनिमा ॥ कर्तव्यमिति व्यापारा
वेशः ॥ तेनांशत्रयवती बुद्धिः ॥ तत्परिणामेन ज्ञानेन तद्रूपस्यातात्विकः संबंधः ॥ दर्पणमलिनि
मेव मुखस्यानुपलब्धिरुच्यते ॥ ज्ञानवत्सुखदुःखेच्छाद्वे [illegible] नधर्मा अपि बुद्धेरेव ॥ कृतिसं
मानाधिकरण्येन प्रतीतेः ॥ न च बुद्धेश्चेतनापरिणामित्व [illegible] तेमतं यास्ते ॥ कृत्यदृष्टनोगा म
नामिव चैतन्यस्यापि सामानाधिकरण्येन प्रतीतेः ॥ तद्विभेदानाभावात् ॥ चेतनोऽहं करोमीति प्र
तीतेः ॥ चैतन्यांशोऽत्र मद् इति चेत् तत्संशोऽपि किं न्यते ॥ अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्य
त्वे तदुत्तेम्ससंसारापत्तिः ॥ अचेतनायाः प्रकृतेः कार्यत्वाद्बुद्धेरचैतन्यं कार्यकारणयोस्ता २७

सत्त्वादितिचेत्॥असिद्धेः॥अचेतनायाः कर्तृत्वेमानाभावात्॥वीतरागजन्मादर्शनात्॥प्रसिद्धेः॥अचेत
नायाः कर्तृत्वे मानाभावात्॥वीतेअनादित्वं॥अनादेर्नाशस्यनाशसंभवान्नित्यत्वं॥तत्किंप्रोक्ता कृ
दिकल्पनेन॥नचप्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः॥अहंकारविमूढात्मा कर्ताहमिति
मन्यत इति अनेन विरोध इति वाच्यं॥प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः॥कर्ताहं कर्ताह
मेवेत्यस्य तदर्थत्वात्॥तत्रैवं सति कर्तारमात्मानं केवलं तु यः॥पश्यत्यकृतबुद्धित्वान्नसपश्य
ति दुर्मतिः॥इत्यादिवद्वतान्तरगतमप्रकटीकृतोयमनुपरिहारोद्रष्टव्य इति संक्षेपः॥धर्माधर्माश्रय
इति॥आत्मेत्यनुषज्यते॥शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेणभोगानुपपत्तेः॥
१ अध्यक्षो विशेषगुणयोगतः इति॥योग्यविशेषगुणसंबंधेनात्मनः प्रत्यक्षं नवत्ति॥नत्वन्य
था॥अहंजानेकरोमीत्यादिप्रतीतेः॥प्रवृत्त्याद्यनुमेयोयं॥अयमात्मापरदेहादौप्रवृत्त्यादिनाऽनु
मीयते॥प्रवृत्तिरत्रचेष्टा॥ज्ञानेच्छाप्रयत्नादीनांदेहेऽभावस्योक्तप्रायत्वात्॥चेष्टायाश्चप्रय
त्नसाध्यत्वात् चेष्टयाप्रयत्नवानात्मानुमीयत इति भावः॥तत्रदृष्टान्तमाह॥रथगत्येवसारथिः॥यथा

सि॰मु॰ २८

द्यपिरथ्यकर्मचेष्टानभवतितथापितेनकर्मणासारथिर्यथाचेष्टात्मकेनकर्मणापरात्मा
पीअनुमीयतेइतिभावः॥अहंकारस्याश्रयोयं॥अहंकारोहमितिप्रत्ययस्तस्याश्रयोविष
यआत्मानशरीरादिरिति॥मनोमात्रस्यगोचरः॥मनोभिन्नेंद्रियजन्यप्रत्यक्षाविषयोमा
नसप्रत्यक्षविषयस्तस्याश्रयोविषयश्चेत्यर्थः॥रूपाद्यभावेनेंद्रियांतरायोग्यत्वात्॥विभु
रिति॥विभुत्वंपरममहत्वपरिमाणवत्वं॥तच्चसर्वमुक्तमपिस्पष्टार्थमुक्तं॥बुध्यादि
गुणवान्॥बुद्धिसुखदुःखेच्छाद्यश्चतुर्दशगुणाः पूर्वमुक्तावेदितव्याः॥अत्रैवप्र
संगाद्बुद्धेःकतिपयप्रपंचंदर्शयति॥बुद्धिस्तुद्विविधेति॥द्वैविध्यंस्फुटयति॥अ
नुभूतिःस्मृतिश्चस्यादनुभूतिश्चतुर्विधा॥प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे॥इ २८

न्द्रियजन्यं ज्ञानं प्रत्यक्षं॥ यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथापीन्द्रियत्वेन रूपे
णेन्द्रियाणां यत्र करणत्वं तत्प्रत्यक्षमिति विवक्षितं॥ ईश्वरप्रत्यक्षं तु न लक्ष्यं॥ इन्द्रियार्थस
न्निकर्षोत्पन्नमिति सूत्रे तथैवोक्तत्वात्॥ अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षं॥ अनुमितौ
व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणे अनुभवस्य करण स्य
त्वान्न तत्रातिव्याप्तिः॥ इदं लक्षणमीश्वरप्रत्यक्षसाधारणं॥ परामर्शजन्यं ज्ञानमनुम
मितिः॥ यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषय
कं ज्ञानमनुमितिः॥ न च क्वचिद्धेतुविषयकानुमितावव्याप्तिरिति वाच्यं॥ तादृशा

त्वी ॥ नन्विदं जातिघटितमपि लक्षणं संशयोत्तरप्रत्यक्षे विशेषदर्शनजन्येऽतिव्याप्तमित्यत आह
ह ॥ अथ एवं - - - - - - ज्ञानस्य मत्याप्तिज्ञानत्वेन तत्र हेतुत्वमिति व्याप्तिरिति भावः ॥ १८

सि॰मु॰ २८ ए ज्ञानहेतुत्वे नु न च त्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ अथैवं व्याप्तिज्ञानकरणं ज्ञा- कं
नमनुमितिः ॥ एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः ॥ पदज्ञानकरणकं ज्ञानं
शाब्दबोधः ॥ वस्तुतो यत्किंचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षावृत्ति
जातिमत्त्वमनुमितित्वं ॥ एवं यत्किंचित्प्रत्यक्षादिव्यक्तिमादाय तद्व्यक्तिवृत्त्यनुमित्य-
वृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति ॥ घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं ॥
घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षं ॥ न चेश्वरप्रत्यक्षस्याविजनना-
न्यत्वं ॥ जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् ॥ उक्तसूत्रानुसारात् ॥ घ्राणस्य
गोचरो गंधो गंधत्वादिरपि स्मृतः ॥ ग्राह्य इत्यर्थः ॥ गंधत्वादिरित्यादिपदात्सुरभि- २८
त्वा २

द्विपरिग्रहः॥ गंधस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा॥ गंधाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बो

तथा ध्यं॥ रसो रसज्ञाग्राह्यस्तथाश्रयोपि चक्षुषेति॥ तथा रसत्वादिसहितस्तथा शब्दः शब्दत्वादिसहितः॥ गंधो रसश्चो तद्वृत्यर्थ

द्भूतो बोध्यः॥ उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्या॥ विभागसंयोगपरापरत्व

स्नेहद्रवत्वं परिमाणयुक्तं॥ क्रियाजातिः॥ ग्रीष्मोष्मादावनुद्भूतरूपमिति न तत्प्रत्यक्षं॥ तद्वंति॥ उ

द्भूतरूपवंति॥ योग्यवृत्तिः समवायश्च तादृशः॥ पृथक्त्वादिकमपि योग्यव्यक्तिवृत्ति बोध्यं ता

दृशः योग्यव्यक्तिवृत्तिरित्यर्थः॥ चक्षुर्योग्यत्वमेव कथं तदाह॥ गृह्णाति चक्षुः संबंधादालोकोद्भू

तरूपयोः॥ आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणं॥ तत्र द्रव्यचाक्षुषं प्रति तयोः सम

वायसंबंधेन कारणत्वं॥ द्रव्यसमवेतप्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेत

स्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेनेति॥ उद्भूतस्पर्शवद्द्रव्यं गोचरः सो

सोऽपि च त्वचः॥

पिउद्भूतस्पर्शोपि स्पर्शत्वादिसहितः॥ रूपान्यत रूपत्वादिभिन्नं चक्षुषो यद्योग्यं तत्व
गिंद्रियस्यापि ग्राह्यं॥ तथा च पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्यगुणा उक्ताः॥ एवं क्रिया एवं जात
यो योग्यव्यक्तिवृत्तयश्च त्वचो ग्राह्या इति॥ रूपमत्रापि कारणं द्रष्टव्यं॥ अत्रापि त्वगिंद्रियज
न्ये द्रव्यप्रत्यक्षे रूपं कारणं॥ तथा च बहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति॥ नवीना
स्तु॥ बहिर्द्रव्यप्रत्यक्षे न रूपं कारणं॥ प्रमाणाभावात्॥ किंतु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्र
[illegible] त्यक्षे च स्पर्शः कारणम् अन्वयव्यतिरेकात्॥ बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति
चेन्न किंचित्॥ आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु॥ रूपस्य कारणत्वे ला
घवमिति चेत्॥ न वायोस्त्वगिंद्रियेण ग्रहणप्रसंगात्॥ इष्टापत्तिरिति चेत्॥ स्पर्श एव लाघ
वात्कारणमस्तु॥ प्रभायाः अप्रत्यक्षत्वे इष्टापत्तिरित्येव किं न स्यात् तस्मात्त्वचा पश्यामीति वदतायुंसु
त्वि

शामीति प्रत्ययसत्त्वाद्द्वयोरपि प्रत्यक्षं भवत्येव ॥ बहिर्द्रव्यप्रत्यक्षमात्रे तु महत्त्वोद्भूतरूपस्य वा स्पर्शस्य हेतु-
त्वं ॥ वायुत्रसरेण्वोरेकत्वं गृह्यत एव द्व्यणुकं चिद्विद्युदादिकमपि क्वचित्तस्या परिमाणग्रहे दोषादिसा-
क्षः ॥ त्वचो योगो मनसा ज्ञानकारणं ॥ त्वङ्मनःसंयोगो ज्ञानसामान्यकारणमित्यर्थः ॥ किं तत्र प्रमा-
णं ॥ सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन मनसा ज्ञानाजननमिति ननु सुषुप्तिकाले किं न
ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा ॥ नाद्यः ॥ अनुभवसामग्र्यभावात् ॥ तथा हि ॥ च-
क्षुरादिना सह मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षं ॥ ज्ञानादेरभावा-
गाल देव न मानसप्रत्यक्षं ॥ ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षमिति ॥ व्याप्तिज्ञानाभावादेव नानुमितिः
॥ सादृश्यज्ञानाभावान्नोपमितिः ॥ पदज्ञानाभावान्न शाब्दबोधः ॥ इत्यनुभवसामग्र्यभावान्ना-
नुभवः ॥ उद्बोधकाभावान्न स्मरणं ॥ मैवं ॥ सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्संबंधेनात्म-

सि॰मु॰
२०

नश्चप्रत्यक्षत्वप्रसंगात्॥ तदतीन्द्रियत्वे मानाभावात्सुषुप्तिप्राक्काले निर्विकल्पमेव नियमेन ज्ञा
यतइत्यत्रापिप्रमाणाभावात्॥ अथज्ञानमात्रे त्वङ्मनःसंयोगस्य यदिकारणत्वं तदा रासनचाक्षु
षप्रत्यक्षादिकाले त्वाचप्रत्यक्षंस्यात्॥ विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात्॥
परस्परप्रतिबंधादेकमपि वा न स्यादिति॥ अत्रकेचि॥ त्सर्वोक्तयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे
सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबंधकत्वमवश्यंतुभवानुरोधात्कल्प्यतइति॥ अ
न्येतु॥ सुषुप्त्यनुरोधाच्चर्ममनःसंयोगस्य ज्ञानहेतुत्वंकल्प्यं॥ चाक्षुषादिप्रत्यक्षकाले त्वङ्म
नःसंयोगाभावान्नत्वाचप्रत्यक्षमिति॥ मनोग्राह्यंसुखंदुःखमिच्छाद्वेषोमतिःकृतिः॥ मनोजन्य
प्रत्यक्षविषयइत्यर्थः॥ मतिर्ज्ञानंकृतिर्यत्न एवं सुखत्वादिकमपि मनोग्राह्यं॥ एवमात्मापि म
नोग्राह्यः॥ किंतु मनोवस्यगोचरइत्यनेन पूर्वमुक्तत्वादत्र नोक्तः॥ ज्ञानं यन्निर्विकल्पाख्यं त

इंद्रियमिष्यते॥चक्षुःसंयोगाद्यनंतरंघटइत्याकारकंघटत्वादिविशिष्टज्ञानंनसंभवतिनपूर्वं
विशेषणस्यघटत्वादेर्ज्ञानाभावात्॥विशिष्टबुद्धौविशेषणज्ञानस्यकारणत्वात्॥तथाचप्रथम
तोघटघटत्वयोर्वैशिष्ट्यानवगाहिज्ञानंजायतेतदेवनिर्विकल्पकं॥तच्चनिर्विकल्पकंनप्रत्य
क्षंतथाहि॥वैशिष्ट्यानवगाहिज्ञानस्यप्रत्यक्षंनभवति॥घटमहंजानामीतिप्रत्ययात्॥तत्रात्म तं
निज्ञानंप्रकारीभूयभासते॥ज्ञानेघटस्तत्रघटत्वं॥प्रकारोयःसएवविशेषणमित्युच्यते॥वि
रो शेषणेयद्विशेषणंतद्विशेषणतावच्छेदकमित्युच्यते॥विशेषणतावच्छेदकप्रकारकंज्ञानंविशि
ष्टवैशिष्ट्यज्ञानेकारणं॥निर्विकल्पकेचघटत्वादिकंनप्रकारस्तेनघटत्वादिविशिष्टघटादिवै
वैशिष्ट्यज्ञानंनसंभवति॥घटत्वाद्यप्रकारकंघटादिविशिष्टज्ञानंनसंभवति॥जात्यतिरिक्तपदा
र्थज्ञानस्यकिंचिद्धर्मप्रकारकत्वनियमात्॥महत्वंषड्विधेहेतुः॥द्रव्यप्रत्यक्षेमहत्वंसमवायसं

सि॰मु॰ ३१

बंधेन कारणं॥ द्रव्यसमवेतानां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन तत्समवेतसमवेतप्रत्यक्षे स्वाश्र
यसमवेतसमवायसंबंधेन कारणमिति॥ इंद्रियमिति॥ तत्रापि न बुद्धिरित्यनुषज्यते॥ इंद्रियत्वं
तु न जातिः पृथिवीत्वादिना संकरप्रसंगात्॥ किंतु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञा
न कारणमनःसंयोगाश्रयत्वं॥ आत्मादिवारणाय सत्यंतं॥ उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वाच्छ
ब्देतरेति॥ विशेषगुणस्य त्वगादेश्चक्षुषि सत्त्वादुद्भूतेति॥ उद्भूतत्वं न जातिः॥ शुक्लत्वादिना संकरा
त्॥ न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं॥ उद्भूतरूपत्वादिना चाक्षुषादिजनक
त्वानुपपत्तेः॥ किंतु॥ शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना॥ तदभावकूटश्चोद्भूतत्वं॥ तच्च सं
योगादावपि॥ तथा च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादावस्त्यतो विशेषेति॥ कालादिवा
रणाय विशेष्यदलं॥ इंद्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वात्॥ इंद्रिया

वयवारणायकालादौरूपाभावप्रत्यक्षसन्निकर्षघटकतयाकारणीभूतचक्षुःसंयोगाश्र
यस्यकालादेर्वारणायमनःपदं॥सा न[illegible]कारकमित्यपितद्वारणाय॥करणमिति॥असाधार
करणं णंकारणं॥असाधारणत्वे व्यापारवत्त्वं॥व्यापारःसन्निःकर्षः॥षड्विधंकर्षमुदाहरणद्वारा सन्नि
दर्शयति॥द्रव्यग्रहइति॥द्रव्यग्रहस्तुसंयोगात्संयुक्तसमवायतः॥द्रव्येषुसमवेता
नांतथातत्समवायतः॥तत्रापिसमवेतानांशब्दस्यसमवायतः॥तद्वृत्तीनांसमवेत
तसमवायेनतुग्रहः॥विशेषणतयातद्वदभावानांग्रहोभवेत्॥द्रव्यप्रत्यक्षमिंद्रिय
संयोगजन्यं॥द्रव्यसमवेतप्रत्यक्षमिंद्रियसंयुक्तस्यसमवायजन्यमेवमग्रेपि॥वस्तुत
स्तुद्रव्यचाक्षुषंप्रतिचक्षुःसंयोगःकारणं॥द्रव्यसमवेतचाक्षुषंप्रतिचक्षुःसंयुक्तस
मवायः॥द्रव्यसमवेतसमवेतचाक्षुषंप्रतिचक्षुःसंयुक्तसमवेतसमवायः॥एवं

मन्यत्रापि विशिष्यैव कार्यकारणभावः ॥ परंतु पृथिवीपरमाणुनीले नीलत्वं पृथिवीपरमाणौ
पृथिवीत्वं च चक्षुषा कथं न गृह्यते ॥ च तत्र परं यो उद्भूतरूपसंबंधस्य महत्वसंबंधस्य च विद्यमा पर
नत्वात् ॥ तथाहि ॥ नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्त्तते ॥ तथा च महत्वसं
बंधो घटनीलमात्र एव वर्त्तते ॥ रूपसंबंधस्तु उभयमात्र एव वर्त्तते ॥ एवं पृथिवीत्वेपि घ
टादिकमादाय महत्वसंबंधो बोध्यः ॥ एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्र
त्वाव त्यक्षं स्यात् ॥ तस्मादुद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवे त
तप्रत्यक्षे ॥ तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतप्रत्यक्षे कारणत्वं
वाच्यं ॥ इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः ॥ परमाणौ चक्षुःसंयोगस्य महत्वाऽ
वच्छिन्नत्वाभावात् ॥ एवं वायौ न सत्तादिचाक्षुषं ॥ उद्भूतत्वे चक्षुःसंयोगस्योद्भूतरूपत्वाव

छिन्नत्वाभावात्॥ एवं यत्र घटस्य दृष्टावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्त्वप्राकच्छे
देन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगविशेषणं बोध्यं॥ एव
वं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणं॥ द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्त
समवायः॥ द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः॥ अ
त्रापि महत्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यं॥ एवं गंधप्रत्य
क्षे घ्राणसंयुक्तसमवायः॥ रसप्रत्यक्षे रसनसंयुक्तसमवायः॥ गंधसमवेतस्य
घ्राणजन्यप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः॥ रससमवेतस्य रासनप्रत्यक्षे
र रसनसंयुक्तसमवेतसमवायः कारणं॥ शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः॥ शब्दस
मवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः॥ अत्र सर्वप्रत्यक्षं लौकिकं बो

ध्यं॥ वक्ष्यमाणमलौकिकप्रत्यक्षमिंद्रियसंयोगादिकं विनापि भवति॥ एवमात्मप्रत्यक्षे म-
नःसंयोग आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः॥ आत्मसमवेतसमवेतमान-
सप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणं॥ अभावप्रत्यक्षे समवायप्रत्यक्षे चेंद्रिय-
संबद्धविशेषणता हेतुः॥ वैशेषिकमते तु समवायो न प्रत्यक्षः॥ अत्र यदि स्यादुपलभ्येते-
त्येवं यत्र प्रसज्यते॥ प्रत्यक्षं समवायस्य विशेषणतया भवेत्॥ अभावप्रत्यक्षे योग्या-
नुपलब्धिः कारणं तथाहि॥ भूतलादौ घटादिज्ञाने घटाभावादिकं न ज्ञायते॥ ते-
नाभावोपलंभे प्रतियोग्युपलंभाभावः कारणं॥ तत्र योग्यतापेक्षिता॥ सो च तर्कितप्रति-
योगिसत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा॥ तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्र-
सक्त्या प्रसंजितउपलंभनरूपः प्रतियोगी यस्य स उपलंभाभावोऽभावप्रत्यक्षे हेतुः॥ तथा

दि॥ यत्रालोकसंयोगादिवर्त्तते तत्र यद्यत्र घटस्यात्तर्हि उपलभ्येतेत्यापादयितुं शक्यते तत्र घटा-
भावादिप्रत्यक्षं भवति॥ अंधकारे तु नापादयितुं शक्यते तेन घटाभावादेरंधकारे चाक्षुषप्रत्यक्षं
न॥ स्पार्शनप्रत्यक्षं तु भवत्येव॥ आलोकसंबंधं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्-
यत्वात्॥ गुरुत्वादिकं यद्ययोग्यं तद्भाववत्तु न प्रत्यक्षः॥ तत्र गुरुत्वादिप्रत्यक्षस्यापादयितु-
मशक्यत्वात्॥ वायौ उद्भूतरूपाभावः॥ पाषाणे सौरस्याभावो गुडे तिक्ताभावः॥ वह्नौ तु छा-
भावः॥ श्रोत्रे शब्दाभावः॥ आत्मनि सुखाभाव एवमादयः तत्तदिंद्रियैर्गृह्यंते॥ तत्र प्रत्यक्ष-
स्यापादयितुं शक्यत्वात्॥ संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता॥ अन्योन्याभावप्रत्यक्षेऽ-
धिकरणयोग्यत्वमपेक्षितं॥ अतः स्तंभादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव॥ प्रत्यक्षं लौकि-
कालौकिकभेदेन द्विविधं॥ तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्ष उक्तः॥ अलौकिकसन्निकर्षा निहा

लौकिक

नीव इति ॥ अलौकिकस्तु व्यापारस्त्रिविधं परिकीर्त्तितः ॥ व्यापारः सन्निकर्षः ॥ सामान्यल
क्षणो ज्ञानलक्षणो योगजस्तथा ॥ सामान्यं लक्षणं यस्येत्यर्थः ॥ तत्र लक्षणपदेन यदि स्व
रूपमुच्यते ॥ तदा सामान्यस्वरूपं प्रत्यासत्तिरित्यर्थो लभ्यते ॥ तच्चेंद्रियसंबद्धविशेष्यक
ज्ञाने प्रकारीभूतं बोध्यं ॥ तथा हि ॥ यत्र चेंद्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञा
नं जातं तत्र ज्ञाने धूमत्वं प्रकारः ॥ तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमवि
षयकं ज्ञानं जायते ॥ अत्र यदींद्रियसंबद्धमित्येवोच्यते तदा धूलीपटले धूमत्वभ्रमानंतरं स
कलधूमविषयकं ज्ञानं न स्यात् ॥ तत्र धूमत्वेन सहेंद्रियसंबंधाभावात् ॥ मन्मते ॥ इंद्रिय
संबंधं धूलिपटलं तद्विशेष्यकं धूम इति ज्ञानं ॥ तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः ॥ इंद्रि २४
यसंबंधश्च लौकिको ग्राह्यः ॥ इदं च बहिरिंद्रियस्थले मानसस्थले तु ज्ञानप्रकारीभूतं सा

मान्यं संन्निकर्षः ॥ परंतु समानानां भावः सामान्यं तच्च क्वचिन्नित्यं द्रव्यत्वादि ॥ क्वचिच्चानित्यं घ
टत्वादि ॥ यत्रैको घटः संयोगसंबंधेन भूतले समवायसंबंधेन कपाले वा ज्ञातः तदनंतरं स
र्वेषां तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं न भवति तत्रेदं बोध्यं ॥ परंतु सामान्यं येन
संबंधेन ज्ञायते तेन संबंधेनाधिकरणानां प्रत्यासत्तिः ॥ किंतु यत्र तद्घटनाशानंतरं तद्
घटवतः स्मरणं जातं तत्र सर्वेषां तद्घटवतां ज्ञानं न स्यात् ॥ सामान्यस्य तदानीमभावात् ॥ किं
चेंद्रियसंबद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इंद्रियसंबंधं विनापि तादृ
शज्ञानप्रकारीभूतसामान्यसत्वात्सकलघटविषयकं ज्ञानं कुतो न जायते ॥ तस्मात्सामान्य
ज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्यादि ॥ आसत्तिराश्रयाणां तु प्रत्यासत्तिरित्यर्थः ॥ सामान्यज्ञा
नमिष्यते ॥ तथा च सामान्यलक्षणइत्यत्र लक्षणशब्दस्य विषयोऽर्थः ॥ तेन सामान्य वि-

षयकं ज्ञानं प्रत्यासत्तिरिति लभ्यते ॥ ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्त्तते त
त्र सकलघटादीनां प्रत्यक्षं स्यादत आह ॥ तदिंद्रियजतद्धर्मबोधसामग्र्य–पेक्ष्यते ॥ अस्यार्थः
॥ यद्वा बहिरिंद्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यज्ञान
स्य तदिंद्रियजन्यज्ञानस्य सामग्र्यपेक्षिता ॥ सा च सामग्री चक्षुःसंयोगादिकं तेनांधका र
रे चक्षुरादिना तादृशज्ञानं न जायते ॥ ननु ज्ञानलक्षणप्रत्यासत्तिर्ज्ञानरूपा यदि सामान्यलक्ष
णापि ज्ञानरूपा तदा तयोर्भेदो न स्यात् अत आह ॥ विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः
॥ योगजो द्विविधः प्रोक्तो युक्तयुंजानभेदतः ॥ युक्तस्य सर्वदा भानं चिंतासहकृतोऽपरः ॥ सामा
न्यज्ञानरूपा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति ॥ ज्ञानलक्षणप्रत्यासत्तिस्तु यद्विषयकं ज्ञा
नं तस्यैव प्रत्यासत्तिरिति ॥ अयमर्थः ॥ प्रत्यक्षे सन्निकर्षं विना ज्ञानं न संभवति ॥ छमत्वेन

सकलधूमानांवह्नित्वेनसकलवह्नीनांचभानंकथंभवतुतदर्थंसामान्यलक्षणास्वीक्रियते॥
नचसकलवह्निधूमानामननुभवेकाक्षतिरितिवाच्यं॥प्रत्यक्षधूमेवह्निसंबंधस्यगृहीतत्वादन्य
धूमस्यचानुपस्थितत्वाद्धूमोवह्निव्याप्योनवेतिसंशयानुपपत्तेः॥मन्मतेतुसामान्यलक्षणयास
कलधूमोपस्थितौकालांतरीयदेशांतरीयधूमेवह्निव्याप्यत्वसंदेहःसंभवति॥नचसामा
न्यलक्षणास्वीकारेप्रमेयत्वेनसकलप्रमेयज्ञानेजातेसार्वज्ञ्यापत्तिरितिवाच्यं॥प्रमेय
त्वेनसकलज्ञानेजातेपिविशिष्यसकलपदार्थानामज्ञातत्वेनसार्वज्ञ्याभावात्॥एवंज्ञान
लक्षणास्वीकारेसुरभिचंदनमितिज्ञानेसौरभस्यभानंकथंस्याद्यद्यपिसामान्यलक्षणया
सौरभस्यभानंसंभवति॥तथापिसौरभत्वस्यभानंज्ञानलक्षणया॥एवंधूमत्वेनधूलीपट
लेधूमत्वेज्ञातेतत्रधूलीपटलस्यानुव्यवसायेभानंज्ञानलक्षणया॥योगजोद्विविधः॥प्रोक्तोयुं

ज्ञानाश्च ॥ अतो योगजधर्मस्यापि दृष्टविध्यं ॥ युक्तस्य ॥ तावद्योगजधर्मसहायेन मनसा आकाश
परमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति ॥ द्वितीयस्य चिंताविशेषोपि स
हकारीति ॥ अनुमितिं व्युत्पादयति ॥ ॥ व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥ अनुमायां
अनुमितौ ॥ व्याप्तिज्ञानं करणं ॥ परामर्शो व्यापारः ॥ तथाहि ॥ येन पुरुषेण महानसादौ धूमवन्ह्यो
र्व्याप्तिर्गृहीता पश्चात्स एव पुरुषः क्वचित्पर्वतादौ अनवछिन्नमूलां धूमरेखां पश्यति तदनं
तरं च धूमो वन्हिव्याप्य इत्येवंरूपं व्याप्तिस्मरणं तस्य भवति ॥ पश्चाच्च वन्हिव्याप्यधूमवानयं पर्व
त इति ज्ञानं भवति स एव परामर्श इत्युच्यते ॥ तदनंतरं पर्वतोयं वन्हिमानिति ज्ञानं जायते तदे
वानुमितिः ॥ अत्र प्राचीनाः वदंति ॥ व्याप्यत्वेन ज्ञायमानं धूमादिलिंगमनुमितिकरणमिति
॥ तद्दूषयति ॥ ज्ञायमानं लिंगं तु करणं न हि लिंगस्यानुमित्यकरणत्वे युक्तिर्महे ॥ अनागतादि

लिंगेननस्यादनुमितिस्तदा॥यद्यनुमितौलिंगंकरणंस्यात्तदानागतेनविनष्टेनवालिंगेनानु
मितिर्नस्यादनुमितिकरणस्यलिंगस्यतदानीमभावादिति॥व्याप्यस्यपक्षवृत्तित्वधीःपरामर्श
उच्यते॥व्याप्तिविशिष्टस्यपक्षेणसहवैशिष्ट्यावगाहिज्ञानंअनुमितौजनकंतच्चव्याप्यःपक्षेइति
ज्ञानंपक्षोव्याप्यवानितिज्ञानंवा॥अनुमितिस्तुपक्षेव्याप्यइतिज्ञानात्पक्षेसाध्यमित्याकारिका
॥पक्षोव्याप्यवानितिज्ञानात्पक्षःसाध्यवानिति॥द्विविधादपिपरामर्शात्पक्षःसाध्यवानित्येवा
नुमितिरित्यन्ये॥ननुवह्निव्याप्यधूमवान्पर्वतइतिज्ञानंविनापियत्रपर्वतोधूमवानितिप्र
त्यक्षंततोधूमोवह्निव्याप्यइतिस्मरणंतत्रज्ञानद्वयादनुमितिदर्शनात्व्याप्तिविशिष्टवैशिष्ट्या
वगाहिज्ञानंनसर्वत्रकारणं॥किंतुव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनकारण
त्वं॥आवश्यकत्वात्॥विशिष्टज्ञानकल्पनेगौरवाच्चेतिचेत्॥न॥व्याप्यतावच्छेदकाज्ञानेपि

सि॰मु॰
२७

वह्निव्याप्यवानितिज्ञानादनुमित्युत्पत्तेर्लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वं॥ किं
च॥ धूमवानयं पर्वत इतिज्ञानादनुमित्यापत्तिः॥ व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकज्ञानस्य सत्वा
त्॥ न च गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं वाच्यं॥ चैत्रस्य व्याप्तिग्र
हे मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यात्॥ यदि तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं
तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदानंतकार्यकारणभावान्
मन्मते तु॥ समवायेन व्याप्तिप्रकारकंपक्षधर्मताज्ञानं समवायेन अनुमितिं जनयतीत्यर
र्थेनानंतकार्यकारणभावः॥ यदि तु व्याप्तिप्रकारकंज्ञानंपक्षधर्मताज्ञानंच स्वतंत्रं कारणमि
त्युच्यते॥ तदा कार्यकारणभावद्वयं वह्निव्याप्यो धूमः आलोकवान्पर्वत इति ज्ञानादप्यनुमिति
स्यादिति॥ इत्थं च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयं॥ फलमुखगौरवस्यादोषत्वे

नार
२७

द्दीति॥ व्याप्यो नाम व्याप्त्याश्रयः॥ तत्र व्याप्तिः केत्यत आह॥ व्याप्तिः साध्यवदन्यस्मिन्नसंबंध उदाहृ
तः॥ वह्निमान् धूमादित्यादौ साध्यं वह्निः॥ साध्यवान्महानसादिः॥ तदन्यो जलह्रदादिस्तद्वृत्ति
त्वं धूमस्येति लक्षणसमन्वयः॥ धूमवान्वह्नेरित्यादौ साध्यवदन्यस्मिन्नयः॥ पिंडादौ वह्नेः सत्वा
न्नातिव्याप्तिः॥ अत्र येन संबंधेन साध्यं तेनैव साध्यवान्बोध्यः॥ अन्यथा समवायसंबंधेन व
ह्निमान्वह्नेरवयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसंगात्॥ साध्य
वदन्यश्च साध्यवत्वावच्छिन्नप्रतियोगिताकभेदवान्बोध्यः॥ तेन यत्किंचिद्वह्निमतो महानसा
द्भिन्ने पर्वतादौ धूमस्य सत्वेपि न क्षतिः॥ येन संबंधेन हेतुता तेनैव साध्यवदन्यावृत्तित्वं बो
ध्यं॥ तेन वह्निमदन्यस्मिन्धूमावयवे धूमस्य समवायसंबंधेन सत्वेपि न क्षतिः॥ साध्यवदन्या
वृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नाभावस्तेन धूमवान्वह्नेरित्यत्र साध्यवदन्यह्रदादिवृत्ति

सि॰मु॰ ३८ त्वाभावसत्वेपि न क्षतिः ॥ अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ विशिष्टसत्तायाः स
त्तायाश्च ऐक्यात्साध्यवदन्यस्मिन्गुणादौ वृत्तित्वं नास्ति तथापि हेतुतावच्छेदकरूपेण वृत्तित्वं वि
वाच्यं ॥ हेतुतावच्छेदकं वृत्तितानवच्छेदकमिति फलितोर्थः ॥ ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये
साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः ॥ किंच सत्तावान्जातेरित्यादौ साध्यवदन्यस्मिन्सामान्या
दौ हेतुतावच्छेदकसंबंधेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिरत आह ॥ अथवा हेतुमन्निष्ठविर
हाप्रतियोगिना ॥ साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥ हेतुमन्निष्ठेति निष्ठा वृत्तिर्यस्य स तथा ॥
विरहोऽभावः ॥ तथा च हेत्वधिकरणवृत्तिर्योऽभावः ॥ तदप्रतियोगिना साध्येन सह हेतोः सामाना हि ३८
धिकरण्यं व्याप्तिः ॥ अत्र यद्यपि वह्निमान्धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रति
योगित्वं तत्तद्वह्न्यादेरस्तीत्यव्याप्तिः ॥ न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यं ॥ तत्र
ति

दकेरप्युक्तयानावसत्वात्॥ एकसत्वेपिद्वयंनास्तीतिप्रतीतेः॥ गुणवान् द्रव्यत्वादित्यादावव्याप्तिश्च
॥ तथापिसाध्यतावछेदकंप्रतियोगितानवछेदकमितिवाच्यं॥ ननुरूपत्वव्याप्यजातिमत्वात्पृ
थिवीत्यादित्यत्रसाध्यतावछेदिकारूपत्वव्याप्यजातयस्तासांशुक्लत्वादिरूपाणांनीलघटादिवृ
त्त्याभावप्रतियोगितावछेदकत्वमस्तित्यव्याप्तिरितिचेन्न॥ तत्रपरंपरयारूपत्वव्याप्यजातित्वस्यै
वसाध्यतावछेदकत्वात्॥ नहितादृशधर्मावछिन्नाभावःक्वापिपृथिव्यामस्ति॥ रूपत्वव्याप्यजा
तिमान्नास्तीतिबुद्ध्यापत्तेः॥ इदंचादौसाध्येपरंपरयासंबंधेद्रव्यत्वादिकमेवावछेदकं॥ अथवा॥ र
साध्यादिनेहेनव्याप्तेर्नैहात्॥ तादृशस्थलेसाध्यतावछेदकतावछेदकंप्रतियोगितावछेदक
तानवछेदकमितिवाच्यं॥ हेत्वधिकरणंचणंचहेतुतावछेदकविशिष्टाधिकरणंवाच्यं॥ तेनद्रव्यं
गुणकर्मान्यत्वविशिष्टसत्वादित्यादौशुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेपिन॥

व्यत्वस्य नाव्याप्तिः॥ हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं॥ तेन समवायेन धूमाधिकरणं तद्व
यवनिष्ठाभावप्रतियोगित्वेपि वन्हेर्नाव्याप्तिः॥ अभावश्च प्रतियोगिव्यधिकरणो बोध्यः॥ तेन कपिः
संयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन तद्वृक्षत्ति कपिसंयोगाभावप्रतियोगित्वेपि कपिसंयो वृ
गस्य नाव्याप्तिः॥ न च प्रतियोगिव्यधिकरणत्वं॥ यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तथैवाव्याप्ति
॥ प्रतियोगिनः कपिसंयोगस्यानधिकरणे गुणादौ वर्त्तते योऽभावः॥ तस्यैव वृक्षे मूलावच्छेदेन स
त्वात्॥ यदि प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगिसत्वादित्यादावव्याप्तिः॥ सत्ताधिकरण
ग्य गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यं॥ हेत्वधिकरणे प्रतियोग्य ति
ति नधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात्॥ स्वंप्रयोग्यनधिकरणहेत्वधिकरणवृत्तिअभा
वइति निष्कर्षः॥ प्रतियोग्यनधिकरणं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं बोध्यं॥ तेन ३९

षिशिष्टसत्तावान् जातेरित्यादौ ज्ञास्यधिकरणगुणादेर्विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेपिन
ष्टतिः ।। अत्र साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणवृत्तित्वविशिष्टत्वं बोध्यं ।। तेन ज्ञानवा
न्सत्वादित्यादौ सत्ताधिकरणघटादेर्विषयतया सत्तानाधिकरणत्वेपि न क्षतिः ।। इत्थं च वह्निमान् धूम
मादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्वे न क्षतिः ।। ननु प्रतियोगितावच्छेदकावच्छिन्न
स्य यस्य कस्यचिदनधिकरणत्वं तत्समानस्य वा ।। यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधि
करणत्वं वा विवक्षितं ।। आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः ।। कपिसंयोगाभावस्यापि प्र
तियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिरपि कपिसंयोगो भवति ।। तदनधिकरणं च वृक्ष इति ।। द्विती
ये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः ।। सर्वस्यैवाभावस्य दर्वक्षणवृत्तित्वविशिष्टस्याभावा
वात्मकप्रतियोगिसमानाधिकरणत्वात् ।। न च वह्निमान् धूमादित्यादौ घटाभावादेः स्वाभावात्मक

दि॰मु॰
४० श्रि

प्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेः तथापि साध्यतावच्छेदकसंबंधेन तत्प्रतियोग्यनधिकरणं हेतुमत्त्व
मस्त्येवेति कथं प्रतियोग्यव्यधिकरणाभावाप्रसिद्धिरिति वाच्यं॥ घटाभावे यो वन्ह्यभावस्तस्य घटाभा
वात्मकतया घटाभावस्य वन्हिरपि प्रतियोगी तदधिकरणं च पर्वतादीति क्रमेण प्रतियोग्यव्यधि
करणस्याप्रसिद्धत्वात्॥ यद्यपि घटाभावादेर्वन्ह्यभावादिर्भिन्नस्तदुच्यते॥ तथापि धूमाभाववा
न्वन्ह्यभावादिवाहित्यादावव्याप्तिः॥ तत्र साध्यतावच्छेदकसंबंधः स्वरूपसंबंधस्तेन संबंधे
न च सर्वस्यैवाभावस्य हृदवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वाद्धेत्वधिकरण
स्येति॥ तत्तीर्थे तु कपिसंयोगाभाववानात्मत्वादित्यादावव्याप्तिः॥ तत्रात्मवृत्तिकपिसंयोगाभावा
भावः कपिसंयोगस्तस्य प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि तदवच्छिन्नानधिक
रणत्वं च हेत्वधिकरणस्यात्मन इति॥ मैवं॥ यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकर ४०

णत्वं हेतुमन्निष्ठाभावप्रतियोगितानाश्रयत्वस्य विवक्षितत्वात् ॥ ननु कालो घटवान् कालपरिम
माणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः ॥ हेत्वधिकरणमहाकालस्य जगदाधा
रतया सर्वेषामेवाभावानां साध्यतावच्छेदकसंबंधेन कालिकविशेषणतया प्रतियोग्यधि
करणसत्वात् ॥ अत्र केचित् ॥ महाकालत्वेन विशिष्टघटाभावस्तत्र प्रतियोगिव्यधिक
रणः महाकालस्य घटाधारत्वेपि महाकालत्वेन विशिष्टघटानाधारत्वात् ॥ महाकालेम
हाकालत्वेनाभावात् ॥ वस्तुतस्तु ॥ प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणी
भूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वो
भयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नत्वस्य तद्धेतुव्यापकत्वं बोध्यं ॥ व्यापकसामाना
धिकरण्यं च व्याप्तिः ॥ इष्टं च कालो घटवान् कालपरिमाणादित्यादौ संयोगसंबंधेन घटा

सि.मु.
४१

नो
नावप्रतियोगी नैघटस्यानधिकरणैंडेत्वाधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावस्तस्य
प्रतियोगितायां कालिकसंबंधावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावस्य सत्त्वान्नाव्याप्तिः॥ ननु प्रमे
यवह्निमान् ह्रदमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धं॥ गुरुधर्मस्यानवच्छेदकत्वादिति चे
न्न॥ कंबुग्रीवादिमान्नास्तीति प्रतीत्या कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणे न गुरु
धर्मस्याप्यवच्छेदकत्वस्वीकारात्॥ इति संक्षेपः॥ छ॥ पक्षवृत्तित्वमित्यत्र पक्षत्वं किं दृढ॥ सिसाधयि
षयाशून्यासिद्धिर्यत्र न तिष्ठति॥ स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्॥ सिसाधयिषाविरहविशि
ष्टायाः सिद्धेरभावः पक्षता भूतहान्वक्षरत्यर्थः॥ सिसाधयिषामात्रं न पक्षता॥ विनापि सिसाधयि
षां घनगर्जितेन मेघानुमानात्॥ अत एव साध्यसंदेहोऽपि न पक्षता विनापि संदेहं तदनुमानात्॥ सिद्धौ
सत्यामपि सिसाधयिषासत्त्वेऽनुमितिर्भवत्येव॥ अतः सिसाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणं॥ ४१

तथा च यत्र सिद्धिर्नास्ति तत्र सिसाधयिषायां सत्यामपि पक्षता॥ यत्र सिसाधयिषास्ति तत्र सिद्धौ सत्यामस
त्यां च पक्षता॥ यत्र तु सिद्धिरस्ति सिसाधयिषा च नास्ति तत्र न पक्षता॥ सिसाधयिषाविरहविशिष्ट
सिद्धेः सत्वात्॥ न तु यत्र परामर्शानंतरं सिद्धिस्ततः सिसाधयिषा तत्र सिसाधयिषाकाले परामर्शान
नानुमितिः॥ यत्र सिद्धिपरामर्शौ सिसाधयिषाक्रमेण भवंति तत्र सिसाधयिषाकाले सिद्धेर्नाशात्प्र
तिबंधकत्वाभावादेवानुमितिः॥ यत्र सिसाधयिषासिद्धिपरामर्शास्तत्र परामर्शकाले सिसाधयिषैव
नास्ति॥ एवमन्यत्रापि सिद्धिकाले परामर्शकाले च न सिसाधयिषा॥ योग्यविभुविशेषगुणानां यौग
पद्यनिषेधात्कथं सिसाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न॥ यत्र वह्निव्याप्यधूमवान
र्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा॥ ततः सिसाधयिषा तत्र पक्षतासंपत्तये तद्विशेषणस्यावश्यक
त्वादिति॥ अत्रेदं बोध्यं॥ यादृशसिसाधयिषासत्वे यल्लिंगकानुमितिस्तादृशसिसाधयि-

षिषाविरहविशिष्टसिद्ध्यभाववल्लिंगकानुमितौ पक्षता॥ तेन सिद्धिपरामर्शसत्वेपि किंचिज्ज्ञानं जायता
मितीछायामपि नानुमितिः॥ वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षसत्वेप्रत्यक्षातिरिक्तज्ञा
नंजायतामितीछायांतु भवत्येव॥ एवं धूमपरामर्शसत्वे आलोकेन वह्निमनुमिनुयामीछायामपिनानुमि
तिः॥ सिसाधयिषाविरहकाले यादृशसिद्धिसत्वे नानुमितिस्तादृशी सिद्धिर्विशिष्यैव वक्तव्या॥ तेन पर्वत
स्तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्वेप्यनुमितेर्नरोधः॥ परंतु पक्षतावछेदकसामानाधि वि
करण्येन साध्यसिद्धावपि तदवछेदेनानुमितिदर्शनात्पक्षतावछेदकावछेदेनानुमितिं प्रतिप
क्षतावछेदेन सिद्धिरेव प्रतिबंधिका॥ पक्षतावछेदकसामानाधिकरण्येनानुमितिं प्रतितु सि
द्धिमात्रं विरोधि॥ इदंतु बोध्यं॥ यत्रायं पुरुषो नवेति संशयानंतरं पुरुषत्वव्याप्यकरादिमानिति
ज्ञानं तत्रासत्यामनुमित्सायां पुरुषत्वस्य प्रत्यक्षं भवति नत्वनुमितिः॥ अतोऽनुमित्साविरहवि ५२

त्व

शिष्टसमानविषयकप्रत्यक्षसामग्रीकामिनीजिज्ञासादिवत्स्यात्तंत्रेण प्रतिबंधिका॥ एवंपरामर्शानंतरं वि
ना प्रत्यक्षेच्छां पक्षादिप्रत्यक्षानुमितेः॥ प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्रीभिन्नविषयकप्रत्यक्षे प्र
ति बंधिका॥ प्रसंगाद्धेत्वाभासान्निरूपयते॥ अनैकांतो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः॥ कालात्ययाप
दिष्टश्च हेत्वाभासाश्च पंचधा॥ आद्यः साधारणस्तु स्यादसाधारणकोऽपरः॥ तथैवानुपसंहारि त्रे
धानैकांतिको भवेत्॥ तल्लक्षणं च॥ यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्धत्वं॥ तथा
हि॥ व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः॥ यद्विषयकत्वं च यादृशविशि
ष्टविषयकत्वं बोध्यं॥ तेन बाधभ्रमस्यानुमितिविरोधित्वेपि तत्र पर्वतो वह्न्यभाववानिति विशि
ष्टस्याप्रसिद्धत्वान्न हेतुदोषः॥ न च यत्र वह्न्यभाववद्व्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्
निव्याप्यधूमस्याभासत्वं न स्यात्॥ तत्र वह्न्यभाववद्व्याप्यवान् पक्ष इति विशिष्टस्याप्रसिद्धत्वादि

सि. मु.
४३
हेर

द्विति वाच्यं ॥ इष्टापत्तेः ॥ अन्यथा बाधस्याप्यनित्यदोषत्वापत्तेः ॥ तस्मात्तत्र वन्ह्यभावव्याप्यपाषाणमय
त्ववानिति परामर्शकाले वन्हिव्याप्यधूमस्य नाभासत्वं ॥ अस्मादनुमितिप्रतिबंधमात्रं ॥ हेतुस्तु न
दुष्ट इति ॥ इत्थं च साध्याभाववद्वृत्तित्वादिकं दोषः ॥ तद्वत्त्वाच्च हेतौ येन केनापि संबंधेनेति व्या न
पारेतु ॥ यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वं ॥ सत्प्रतिपक्षे विरोधि
व्याप्त्यादिकमेव तथा ॥ तद्वत्त्वं हेतोर्ज्ञानरूपसंबंधेन ॥ न चैवं वन्हिमान् ह्रदमध्यादित्यादौ बाधभ्र
मस्य पक्षे साध्याभावविषयकत्वेनानुमितिविरोधित्वात् ॥ ज्ञानरूपसंबंधेन तद्वत्त्वस्यापि स
त्वात् ॥ सद्धेतोरपि बाधितत्वापत्तिरिति वाच्यं ॥ तत्र ज्ञानस्य संबंधत्वाकल्पनादत्र सत्त्वेऽपि पर
भारति व्यवहारेण तत्कल्पनात्तत्र बाधितव्यवहाराभावादित्याहुः ॥ अनुमितिविरोधित्वं च अनु
मितितत्कारणज्ञानान्यतरविरोधित्वं ॥ तेन व्यभिचारिणीनाक्षतिः ॥ दोषज्ञानं च यद्धेतुविषय ४२

कंतद्धेतुकानुमितौ प्रतिबंधकं॥ तेन एकहेतौ व्यभिचारज्ञाने हेत्वंतरेणानुमित्युत्पत्तेस्तद्धेत्वा वा
द्यनवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेपि न क्षतिरिति संक्षेपः॥ यादृशसाध्य
पक्षहेतौ यावंतो हेत्वाभासास्तावद्भिन्नान्यत्वं तत्र हेत्वाभासत्वं॥ पंचकथनं तु तत्संनवस्तुज्ञप्तिप्रायेण॥ ए
ध्। वं साधारण्यन्यतमत्वमनैकांतिकत्वं॥ साधारणः साध्यवदन्यवृत्तिः॥ तेन च व्याप्तिज्ञानप्रतिबं
धः क्रियते॥ असाधारणः साध्यासमानाधिकरणः॥ तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्य
ते॥ अन्ये तु सपक्षावृत्तिरसाधारणः॥ सपक्षश्च निश्चितसाध्यवान्॥ इदं च यदा पक्षे साध्यनिश्च
यस्तदानासाधारणं तत्र हेतोर्निश्चयादित्याहुः॥ अनुपसंहारी च अत्यंताभावाप्रतियोगिसाध्य
कादिः॥ अनेन व्यतिरेकव्याप्तिग्रहप्रतिबंधः क्रियते॥ विरुद्धस्तु साध्यव्यापकीभूताभावप्र
तीयोगी॥ अयं च साध्याभावग्रहसामग्रीत्वेन प्रतिबंधकः॥ सत्प्रतिपक्षे तु प्रति हेतुः साध्याभा

सि·मु· ४४

व साधकः॥ अत्र हेतुरेवेति विशेषः॥ साध्याभाव साधक एव साध्यसाधकत्वेनोपन्यस्त इत्यंशाक्ति
विशेषोन्नायकत्वाच्च विशेषः॥ सत्प्रतिपक्षः साध्याभावव्याप्यवान्पक्षः॥ अगृहीताप्रामा
ण्यकसाध्यव्याप्यवत्त्वेनोपस्थितिकालीनतदभावव्याप्यवत्त्वेनोपस्थितिविषयः सत्यन्ये॥ अ
त्र च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबंधः फलं॥ अत्र केचित्॥ यथा घटाभ
ावव्याप्यवत्ताज्ञाने विद्यमानेपि घटचक्षुः संयोगे सति घटवत्ताज्ञानं जायते॥ यथा च सत्य
पि पीतत्वाभावव्याप्यशंखत्ववत्ताज्ञानेपि सति पित्तादिदोषे पीतः शंख इति धीः॥ एवं कोटि
द्वयव्याप्यदर्शनेपि कोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति॥ तथा सत्प्रतिपक्षस्थले संशय
रूपानुमितिर्भवत्येव॥ यत्र चैककोटिव्याप्यदर्शनं तत्राधिकबलेन तथा द्वितीयकोटिभान
प्रतिबंधान्न संशयः॥ फलबलेन चाधिकसमबलभावः कल्प्यत इत्याहुः॥ तन्न॥ तदभाव ४४

व्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषः शाब्दबोधादेरप्युदयात्॥ लौकिकसंनिकर्षा
जन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबंधकता लाघवात् न तूपनीतभानविशेषशा
ब्दबोधे च पृथक् प्रतिबंधकता॥ गौरवात्॥ तथा च प्रतिबंधकसत्त्वात् कथमनुमितिः॥ न
हि लौकिके संनिकर्षस्थले अप्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रामाणिकी
॥ येनानुमितिभिन्नत्वे नापि विशेषणीयं॥ यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्वाप्रामा
ण्यज्ञानात्संशयः॥ नान्यथा॥ अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबंधकत्वादिति
॥ असिद्धिस्तु आश्रयासिद्ध्यन्यतमा॥ आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः यत्र कां
त चनमयः पर्वतो वह्निमानिति साध्यते॥ तत्र पर्वतो न कांचनमयः इति ज्ञाने विद्यमाने कां
चनमये पर्वते परामर्शप्रतिबंधः फलं॥ स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वेनाभिमतस्याभावः॥

म ना

सि॰मु॰
४५
मा

अत्रह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूप
स्य परामर्शस्य प्रतिबंधः फलं॥ साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिः॥ साध्ये साध्यतावच्छेदका ता
भावः साध्याप्रसिद्धिः एतज्ज्ञाने जाते च कांचनमयवन्हिमानित्यादौ साध्यतावच्छेदकविशिष्ट
साध्यपरामर्शप्रतिबंधःफलं॥ एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः॥ यथा कांचनमय
धूमादित्यादौ अत्र च हेतुतावच्छेदकविशिष्टहेतुज्ञानाभावात् तद्धेतुकव्याप्तिज्ञानादेरभावः॥
एवं वन्हिमान्नीलधूमादित्यादौ गुरुत्वान्नीलधूमत्वस्य हेतुतानवच्छेदकत्वमित्यपि वदंति॥
बाधस्तु पक्षे साध्याभाववदन्यत्वादिः॥ एतस्य चानुमितिप्रतिबंधः फलं॥ तद्धर्मिकत
द्भाववन्निश्चयो लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे विरोधी॥ ननु संशयसा
धारणं पक्षे साध्यसंसृष्टत्वज्ञानमनुमितिकारणं तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभास ४५

सत्वमितियुक्तं॥साध्यसंशयादिकं विनाप्यनुमित्युत्पत्तेः॥एवंसाध्याभावप्रमात्वज्ञानमपिनप्रति
बंधकं॥प्रमाणाभावात्॥गौरवाच्च॥अन्यथासत्प्रतिपक्षादावपितदभावव्याप्यज्ञानप्रमात्वा-
विषयकत्वेनप्रतिबंधकतापत्तेः॥किंतुभ्रमत्वज्ञानानास्कंदितबाधबुद्धेःप्रतिबंधकतातत्
त्रभ्रमत्वशंकाविघटनेनप्रामाण्यज्ञानंक्वचिदुपयुज्यते॥नचबाधस्थलेपक्षेहेतुसत्वे
व्यभिचारःपक्षेहेत्वभावेस्वरूपासिद्धिरेवदोषइतिवाच्यं॥बाधज्ञानव्यभिचारज्ञानादेर्भे-
दात्॥किंचयत्रपरामर्शानंतरंबाधस्तत्रव्यभिचारज्ञानादेरकिंचित्करत्वात्॥बाधस्यानुमि-
तिप्रतिबंधकत्वंवाच्यं॥एवंयत्रोत्पत्तिक्षणावच्छिन्नघटादौगंधआँद्यघिनीत्ववत्ताज्ञानंत प्र
त्रबाधस्यैवप्रतिबंधकत्वंवाच्यं॥नचपक्षेघटेगंधसत्वात्कथंबाधइतिवाच्यं॥पक्षतावच्छे-
दकदेशकालावच्छेदेनतदभावादेरनुभवसिद्धत्वादिति॥~~सत्व~~तिष्ठतव्याप्यभिन्नायेपेहे

बाध

सि·मु·
४६

प्या

सु

त्वाभासास्तद्योपितन्मा, ध्य एवांतर्भवंति ॥ अन्यथा हेत्वाभासाधिक्यप्रसंगात् ॥ बाधव्याप्यं नित्य एव
स्वतंत्रेछेनतु निनाद्य कुत्र पादानात् ॥ सत्वाति पक्षव्याप्यस्तु न प्रतिबंधक इति प्रघट्टिका
र्थः ॥ यः सपक्षे विपक्षे च वर्त्तते साधारणस्तु सः ॥ सपक्षविपक्षवृत्तिः साधारण इत्यर्थः ॥ सप
क्षः साध्यवान् ॥ विपक्षः साध्यवद्भिन्नः विरुद्धवारणाय सपक्षवृत्तित्वमुक्तं ॥ वस्तुतो विपक्षवृ
त्तित्वमेव वाच्यं ॥ विरुद्धस्य साधारणत्वेपि दूषकताबीजस्य भिन्नतया ज्ञातस्य पार्थक्यात् ॥
यस्त्वनयस्माद्व्यावृत्तः स त्वसाधारणो मतः ॥ सपक्षविपक्षव्यावृत्त इत्यर्थः सपक्षः साध्य
वत्तया निश्चितः ॥ विपक्षः साध्यशून्यतया निश्चितः ॥ शब्दोऽनित्यः शब्दत्वात् इत्यादौ यदा
शब्दोऽनित्यत्वसंदेहस्तदा सपक्षत्वं घटादीनामेव तद्व्यावृत्तं च शब्दत्वमिति तत्तदसा
धारणं ॥ यदा शब्देऽनित्यत्वनिश्चयः तदानासाधारणः ॥ इदं तु न सम्यक् पक्षैकदेशसहचारग्रहेपि व्य
१ दृश्यं एव वा नामतत्व नवीनमतं पुर्व भुक्तं केवलान्वयिपक्षक इति सर्वमतिप्रेयं
प्रमेयत्वादि त्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहे स्यत्वातनात्तावां

४६

तेरभावात्॥अस्तुवासहचाराग्रहस्तावतापक्षानरूपासिद्धिरेव॥नतुहेत्वाभासत्वंतस्यतथापिके
वलान्वयिसाध्यकत्वंतत्वमित्युक्तं॥यःसाध्यवतिनैवास्तीतिविरुद्धउदाहृतः॥एवकारेणसाध्या टीकरा
त्यावच्छेदेनहेत्वभावोबोधितस्तथाचसाध्यव्यापकीभूताभावप्रतियोगित्वंतदित्यर्थः॥अ
४ सिद्धंविभजते॥आश्रयासिद्धिराद्यास्यात्स्वरूपासिद्धिरप्यथ॥व्याप्यत्वासिद्धिरपरास्यादसि
द्धिरतस्त्रिधा॥पक्षासिद्धिर्यत्रपक्षोभवेन्मणिमयोगिरिः॥ह्रदोद्रव्यंधूमवत्वादत्रासिद्धि व
रथापरा॥व्याप्यत्वासिद्धिरपरानीलधूमादिकेभवेत्॥विरुद्धयोःपरामर्शेहेत्वोःसत्प्रतिप
क्षता॥असिद्धिंविभजते॥आश्रयासिद्धिरित्यादिपक्षासिद्धिसिद्धिरिति॥आश्रयासिद्धिरित्य
र्थः॥अपरेति॥स्वरूपासिद्धिरित्यर्थः॥नीलधूमादिकइति॥नीलधूमत्वंगुरुतयानहेतुतावच्छे
दकं॥स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैवव्याप्यतावच्छेदकत्वात्॥७२

सि॰मु॰
४७

यत्र गन्धाभावत्वसंग्रहाय समानाधिकरणेति। कपिसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्र
तिपक्षत्वमत उक्तं विरुद्धयोरिति। तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शका
लीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः॥ साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः॥ उत्पत्तिर
कालीनघटे गन्धादिर्यत्र साध्यते। साध्यशून्यस्य इति पक्षः॥ पक्षतावच्छेदकविशिष्ट इत्यर्थः॥
तेन घटे गन्धसत्त्वेपि न क्षतिः॥ एवं मूलावच्छिन्नो वृक्षः कपिसंयोगी इत्यत्रापि बोध्यम्॥ उपमि
तिं ब्रुवन्सादृश्यमिति ग्रामीणस्येति ग्रामीणस्य प्रथमतः पश्यतो गवयादिकं। सादृश्यधीर्गवादीनां
यास्यात्साकरणं मतं॥७९॥ वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते। गवयादिपदानां तु शक्ति
धीरुपमाफलं॥८०॥ यत्रारण्ये केनचित् ग्रामीणाय कथितं गोसदृशो गवयपदवाच्य इति॥ पश्चा
द्ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टः॥ तत्र गोसादृश्यदर्शनं यज्जातं तदुपमितिकरणं ४७

ग

णं। तदनंतरं गोसदृशो गवयपदवाच्य इति अतिदेशवाक्यार्थस्मरणं जायते तदेव व्यापारस्तदनंत
रं गवयो गवयपदवाच्य इति ज्ञानं जायते तदुपमितिः। न त्वयं गवयपदवाच्य इत्युपमितिः। गवयांऽ
६० तरे शक्तिग्रहाभावप्रसंगात्। शाब्दबोधप्रकारं दर्शयति। पदज्ञानं त्विति। न तु ज्ञायमानं पदं करणं प ६०
दाभावेपि मौनिश्लोकादौ शाब्दबोधात् पदार्थधीरिति॥ पदजन्यपदार्थस्मरणं व्यापारः॥ अन्यथाऽ
पदज्ञानवतः प्रत्यक्षादिना उपस्थितस्य घटादेरपि शाब्दबोधापत्तेः। तत्रापि वृत्त्या पदजन्यत्वं बोध्यम्॥
अन्यथा घटादिपदात् समवायसंबंधेन आकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः। वृत्तिश्च श
क्तिलक्षणान्यतरसंबंधः। अत्रैव शक्तिज्ञानस्योपयोगः। दृष्टं शक्तिग्रहाभावे पदज्ञानेपि न तत्संबंधेन
स्मरणानुपपत्तेः। पदज्ञानस्य हि संबंधिज्ञानविधयार्थस्मारकत्वं शक्तिश्च पदेन सह पदार्थसंबंधः
। स च अस्मात् शब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छारूपः। आधुनिके नाम्नि शक्तिरस्त्येव। एकादशेह

नि पिता नाम कुर्यादितीश्वरेच्छायाः सत्वात्। आधुनिकसंकेतिते तु न शक्तिरिति संप्रदायः॥ नव्यास्तु ईश्व
रेच्छा तु न शक्तिः किंत्विच्छैव। तेनाधुनिकसंकेतितेपि शक्तिरस्तीत्याहुः॥ शक्तिग्रहस्तु व्याकरणादितः॥ तथा
हि शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च॥ वा शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धप क्यस्य
दस्य वृद्धाः॥ धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति॥ क्वचित्तु सति बाधके त्यज्यतेपि यथा
वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते। चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः॥
तच्च गौरवात्त्यज्यते किंतु कृतौ शक्तिर्लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते। नच कर्तुरनभि
धानात् चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम्। कर्तृसंख्यानभिधानस्यैव तत्र तंत्रत्वात्। संख्याभि
धानयोग्यश्च कर्मत्वाद्यन वरुद्धः प्रथमांतपदोपस्थाप्यः॥ कर्मत्वादीत्यस्येतराविशेषणत्वतात्प

र्यविषयत्वमर्थः॥ तेन चैत्र एव गच्छतीत्यादौ न चैत्रे संख्यान्वयः॥ तत्र कर्मादौ न विशेषणत्वतात्प

र्यंतद्वारणाय प्रथमांतेति । यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः । तेन चैत्रस्वर्गैतीत्या ७१
वचैत्रादेर्वारणं । स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय द्वितीयदलम् । तस्य द्वितीयांतोपस्थाप्यत्वा
द्वारणं । एवं व्यापारेपि न शक्तिः । गौरेको तु रथो गच्छतीत्यादौ व्यापारे आश्रयत्वे वा लक्षणा । जाना
तीत्यादौ तु आश्रयत्वे । नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा । उपमानात् यथा शक्तिग्रह
स्तथोक्तम् । एवं कोशादपि शक्तिग्रहः । सति बाधके क्वचित् त्यज्यते । यथा नीलादिपदानां नील
रूपादौ नीलादिविशिष्टे शक्तिः कोशेन व्युत्पादिता तथापि लाघवान्नीलादौ शक्तिर्नीलादिवि
शिष्टे तु लक्षणेति । एवमाप्तवाक्यादपि यथा कोकिलः पिकपदवाच्य इत्यादिशब्दात्पिके श नि
क्तिग्रहः । एवं व्यवहारादपि । यथा प्रयोजकवृद्धेन घटमानयेत्युक्तं तच्छ्रुत्वा प्रयोज्यवृद्धेन घ
ट आनीतः । तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमित्य

सि॰मु॰
४९

वधारयति ॥ ततश्च घटं नय पटमानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्वित
घटादौ शक्तिं गृह्णाति । इत्थं च नत्तनेनीजो घट इत्यादिपदान्न शाब्दबोधः । घटादिपदानां का
र्यान्वितघटादिबोधे सामर्थ्यावधारणात् । कार्यताबोधं प्रति च लिङादीनां सामर्थ्यात् तदभा
वान्न शाब्दबोध इति केचित् । तन्न । प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चा
त्तस्य परित्यागौचित्यात् ॥ अत एव चैत्रपुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ मुखप्रसादमालि मुख
न्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषात् शाब्दबोधं निर्णीय तद्धेतुतया शब्दम
वधारयति । तथा च व्यभिचारात् कार्यान्विते न शक्तिः ॥ न च तत्र तं पश्येत्यादिशब्दान्तरम ध्या
हार्यमानाभावात् । चैत्रपुत्रस्ते जातो मृत इत्यादौ तदभावाच्च इत्थं लाघवादन्वितघटेऽपि
शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिमवधारयति । एवं वाक्यशेषादपि शक्तिग्रहः ॥ यथा । ४९

यवमयवश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूके आर्याणां प्रयोगः कंगौ तु म्लेच्छानां। तत्र हि वसंते सर्वस
स्यानां जायते प त्रशातनं मोदमानाश्च तिष्ठंति यवाः कणिशशालिन इति वाक्यशेषात् दीर्घशूके श २१
क्तिर्निर्णीयते। कंगौ तु शक्तिभ्रमात् प्रयोगः। नानाशक्तिकल्पने गौरवात्। गहरिपदादौ विनिगमका
भावान्नानाशक्तिकल्पने। एवं विवरणादपि शक्तिग्रहः। विवरणं तु तत्समानार्थकपदांतरेण तदर्थ
न कथनम्॥ यथा घटोस्तीत्यत्र कलशोस्तीत्यनेन विवरणेन घटपदस्य कलशे शक्तिग्रहः। एवं पचती
त्यस्य पाकं करोतीत्यनेन विवरणेन आख्यातस्य यत्नार्थकत्वं कल्प्यते। एवं प्रसिद्धपदस्य सान्निध्या
दपि शक्तिग्रहः। इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य शक्तिग्रह इति। तत्र जातावेव शक्ति कोकिले
र्न तु व्यक्तौ व्यभिचारादानंत्याच्च। व्यक्तिं विना च जातिभानस्यासंभवात् व्यक्तेरपि भानमिति केचित्
॥ तन्न। शक्तिं विना व्यक्तिभानानुपपत्तेः। न च व्यक्तौ लक्षणा अनुपपत्तिप्रतिसंधा न विनापि व्यक्तिबोधा

सि.मु.
५०

त्वा न च व्यक्तिः शक्या वानंत्यमुपेत्य सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात्। न चाननुगमः।। गोत्वादेरेवानुग
मकत्वात्। किंच गौः शक्येति शक्तिग्रहे यदि तदा व्यक्तौ शक्तिः यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गो
त्वप्रकारकं पदार्थस्मरणं शाब्दबोधश्च न स्यात्। समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मर
णं शाब्दबोधं प्रतिहेतुत्वात्। किंच गोत्वे यदि शक्तिस्तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम्। गोत्वत्वं च
गवेतरासमवेतत्वे सति सकलगोसमवेतत्वं। तथा च गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशे शक्ता
वेव गौरवम्।। तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृ
तिविशिष्टव्यक्तौ विश्राम्यतीति। शक्तं पदं क्वचिद्यौगिकं। क्वचिद्रूढं क्वचिद्योगरूढं। क्वचिद्यौगि तत्र
य करूढं। यत्रावयवार्थ एव बुध्यते तद्यौगिकम्। यथा पाचकादिपदं। यत्रावयवशक्तिनिरपेक्षेण समु मु.
दायशक्तिमात्रेण बुध्यते तद्रूढम्।। यथा गोपदं मंडपादिपदम्।। यत्र त्ववयवशक्तिविषये समुदाय ५०

शक्तिरप्यस्ति तद्योगरूढम् ॥ यथा पंकजादिपदं । तथा हि । पंकजपदमवयवशक्त्या पंकजनिकर्तृत्वरूप-
मर्थं बोधयति । समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति । न च केवलावयवशक्त्या कुमुदे
प्रयोगः स्यादिति वाच्यम् । रूढिज्ञानस्य केवलयौगिकार्थबोधे प्रतिबंधकत्वादिति प्रांचः । वस्तुत-
अव स्तु समुदायशक्त्युपस्थिते पद्मेऽवयवार्थपंकजनिकर्तुरन्वयो भवति । सान्निध्यात् यत्र रूढ्यर्थस्य बाध
ः प्रतिसंधीयते तत्र लक्षणया कुमुदादेर्बोधः । यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं पद्मस्य च बा- न
धस्तत्र चावयवशक्तिमात्रेण निर्वाह इत्याहुः । यत्र तु स्थलपद्मादेरवयवार्थबोधः तत्र समुदायशक्त्या र्थ
पद्मत्वेन रूपेण बोधः । यदि तु स्थलपद्मं विजातीयं तदा लक्षणयेति । यत्र तु यौगिकार्थरूढ्यर्थयोः स्वा-
तंत्र्येण बोधः स यौगिकरूढं । यथा उद्भिदादिपदम् । तत्र हि उ कर्ता तरुगुल्मादिरपि बुध्यते या- द्भिद
गविशेषोऽपि । लक्षणा शक्यसंबंधः इत्यादि । गंगायां घोष इत्यादौ गंगापदस्य शक्येऽर्थे प्रवाहरूपे घोष

सि॰मु॰
५१

स्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसंधीयते तत्र लक्षणया तीरस्य बोधः। सा च शक्यसंबंधः
। तथा हि प्रवाहरूपशक्यार्थसंबंधस्य तीरे गृहीतत्वात्तीरस्य स्मरणं ततः शाब्दबोधः परंतु यद्यन्व
यानुपपत्तिर्लक्षणाबीजं स्यात् । तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात् । यष्टिप्रवेशान्वयस्यानु
पपत्तेरभावात् । तेन प्रवेशे भोजन तात्पर्यानुपपत्त्या यष्टिधरे लक्षणा । एवं काकेभ्यो दधि रक्ष्यता
मित्यादौ काकपदं दध्युपघातके लक्षणा। सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात् । एवं छत्रिणो यांती
त्यादौ छत्रिपदस्यैकसार्थवाहित्वे लक्षणा इयमेवाजहत्स्वार्था लक्षणेत्युच्यते । एकसार्थवाहित्वे
न रूपेण छत्रितदन्ययोर्बोधात् । यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा क्वचिद् गंगापदस्य तीरे क्व
चिद् घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्यात् । इदं तु बोध्यं शक्यार्थसंबंधो यदि तीरत्वेन रूपे
ण गृहीतस्तदा तीरत्वेन रूपेण तीरबोधः । यदि तु गंगातीरत्वेन गृहीतस्तदा तेनैव रूपेण स्मरणं।

यद्धि स्यद

रा॰
५१

अतएवलक्ष्यतावच्छेदकेनलक्षणा। तत्प्रकारकबोधस्यतत्रलक्षणंहि नाप्युपपत्तेः। परंतुएवंकर्मेणशा
क्यतावच्छेदकेपिशक्तिर्नस्यात्। तत्प्रकारकशाब्दबोधस्मरणंप्रतितत्तत्पदस्यसामर्थ्यंनित्यस्यतुवक्तव्यत्वादि
प ३ तिविभावनीयम्। सातुशक्यार्थस्यपरंपरासंबंधरूपालक्षणासालक्षितलक्षणेत्युच्यते। यथाद्विरे
फादिपदेरेफद्वयसंबंधोभ्रमरपदेज्ञायतेभ्रमरपदस्यसंबंधोभ्रमरेज्ञायतेतत्रलक्षितलक्षणा
त किंतुलाक्षणिकंपदंनानुभावकंलाक्षणिकार्थस्यशाब्दबोधेतुपदान्तरं
६ शक्तिलक्षणान्यतरसंबंधेन कारणं ४ इतरपदार्थान्वितस्वार्थशाब्दबोधंप्रतिपदानांसामर्थ्यावधारणात्। वाक्येतुशक्तेरभावात्
शक्यसंबंधरूपालक्षणापिनास्ति। यत्रतुगम्भीरायांनद्यांघोषइत्युक्तंतत्रनदीपदस्यनदीतीरेलक्षणा
गम्भीरपदस्यनद्यासहान्वयः। क्वचिदेकदेशान्वयस्यापिस्वीकृतत्वात्। यदितत्रैकदेशान्वयोनस्वी
क्रियतेतत्रतदानदीपदस्यगम्भीरनदीतीरेलक्षणा। गम्भीरपदंतात्पर्यग्राहकम्॥ बहुव्रीहावप्येवं

सि॰मु॰ मात्तन्न हि चित्रगुपदादौ यथैकदेशान्वयः स्वीक्रियते तदा गोपदस्य गोमतिलक्षणया विचित्राभेदान्व
५२ स्वी यः। यदि तु एकदेशान्वयो नैव स्वीक्रियते तदा गोपदस्य चित्रगोमतिलक्षणा। चित्रपदं तात्पर्यग्राहकं। न तु
रुषे तु पूर्वपदे हि लक्षणा तथा हि। राजपुरुषादिपदे राजपदार्थे नि पुरुषादिपदार्थस्य साक्षान्नान्वयः
। निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात्॥ अन्यथा राजा पुरुष इत्यत्रापि तथा
न्वयबोधः स्यात्। घटो न पट इत्यादौ घटपटाभ्यां नञः साक्षादेवान्वयान्निपातातिरिक्तेति। नीलो घ
ट इत्यादौ नामार्थयोरभेदसंबंधेनान्वयाद्भेदेनेति न च राजपुरुष इत्यादौ लुप्तविभक्तेः स्मरणं क
ल्प्यत इति वाच्यम्। अस्मृतविभक्तेरपि ततो बोधात्। तस्माद्राजसंबंधिनि लक्षणा तस्य पुरुषेण पक्षाद्वोराज
सहाभेदान्वयः। द्वंद्वे तु धवखदिरौ छिं दित्यादौ धवः खदिरश्च विनश्यतीत्यादिप्रकारेण बुध्ये
ते। तत्र न लक्षणा। न च साहित्ये लक्षणेति वाच्यम्। साहित्यस्यान्ययोरपि द्वंद्वदर्शनात् न चैकक्रि ५२

यान्वयित्वरूपं साहित्यमस्तीति वाच्यम् ॥ क्रियाभेदेपि धवखदिरौ पचछिंधी त्यादौ द्वंद्वदर्शनात् ॥ सा
हित्यस्याननुभावाच्च ॥ अत एव राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र लक्षणया वा द्वंद्व
आश्रीयते । तस्मात्साहित्यादिकं नार्थः किंतु वास्तवो भेदो यत्र तत्र द्वंद्वः ॥ न च नीलघटयोरभे
२ दत्वादैकधर्म्यमिति वाच्यम् । तत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणया अभेद इत्यस्य चा
श्रयाभेद इत्यर्थात् ॥ समाहारद्वंद्वे तु यदि समाहारोप्यनुभूयते तदोच्यते तदा अहिनकुलमि
त्यादौ परपदे अहिनकुलसमाहारे लक्षणा । पूर्वपदं तु तात्पर्यग्राहकं ॥ न च भेरीमृदंगं वादयेत्य
स्यान्वयस्य त्र कथं समाहारस्यापेक्षाबुद्धिविशेषविषयत्वस्य रूपवादनासंभवादिति वाच्यम् । परंपरासंबं
९ धेन तदन्वयात् । एवं पंच लीत्यादावपि । अपरे तु अहिनकुलमित्यादौ अहिर्नकुलश्च बुध्यते
॥ तत्रैकमेकत्वान्वयः ॥ समाहारसंज्ञा च यत्रैकत्वं नपुंसकत्वं प्राणितूर्येत्यादिसूत्रेण

२ नीलपदार्थस्य उत्पलपदार्थे अभेदसंबंधेनान्वयः। तत्पत्र ३

क्तं तत्रैव अन्यत्रैकवचनमसाध्वित्याहुः। पितरौ श्वशुरौ इत्यादौ पितृपदे जनकद्वंद्वपरत्वे स्वरूपदे
त्री जनकद्वंद्वयोर्लक्षणा। एवमन्यत्रापि। घटा त्यादौ तु न लक्षणा। घटत्वेन रूपेण नानाघ
टोपस्थितिसंभवात्। कर्मधारयस्थले नीलोत्पलमित्यादौ
लक्षणा। अत एव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषो लक्षणापत्तेः किंतु क
र्मधारयो लक्षणाभावात्। न च निषादस्य संकरजातिविशेषस्य वेदानधिकाराद्याजनासंभव
इति वाच्यं। निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनीयत्वात्। लाघवेन मुख्यार्थान्वये तदनु
पपत्त्या कल्पनायाः फलमुखगौरवतया अदोषत्वादिति। उपकुंभमर्धपिप्पलीत्यादौ परपदे
तत्संबंधिनि लक्षणा। पूर्वपदार्थप्रधानतया चान्वयबोध इति। २ इत्थं च समासे न क्वापि शक्ति
ः। पदशक्त्यैव निर्वाहादिति। आसत्तियोग्यतेत्यादि। आसत्तिज्ञानं योग्यताज्ञानं आकांक्षाज्ञानं

तात्पर्यज्ञानं च शाब्दबोधे कारणं। तत्रासत्तिपदार्थमाह। सन्निधानं त्विति। यत्पदार्थेन सह यत्पदार्थ

शाब्दबोधे स्यान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः कारणम्। तेन गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ

न शाब्दबोधः। तात्पर्यं गर्न्नासत्तिः। नीलो घटो द्रव्यं पट इत्यत्र आसत्तिभ्रमात् शाब्द । आसत्तिभ्र भ्रम

भ्रमा मेण शाब्द भावेपि न क्षतिः। ननु यत्र छत्री कुंडली वासस्वी देवदत्त इत्यादौ तत्रोत्तरपदस्मर

णेन पूर्वपदस्मरणस्य नाशाद्व्यवधाने नैतत्पदस्मरणसंभवतीति चेन्न। प्रत्येकपदानुभवजन्यसं

स्कारैरन्त्यरमतो हि विषयकस्मरणस्याव्यवधानेनोत्पत्तेः। नानासन्निकर्षैरेकत्र त्यक्षस्येव नानासंस्का

रैरेकस्मरणोत्पत्तेरपि संभवात्तावत्पदसंस्कारसहितचरमवर्णज्ञानस्यैव बोधकत्वात्। कथमन्

र्भे यथा नानावरैकपदस्मरणम्। परं तु तावत्पदार्थानां स्मरणादेकदेवरवलेकपोतन्यायात्ताव

त्पदार्थानां क्रियाकर्मभावेनान्वयरूपः शाब्दबोधोऽनवतीति केचित्। तद्दायुवानः शिशवः

कपोताः खले यथा युगपत्पतंति। तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवंति। परं तु यद्य
दाकांक्षितं योग्यं सन्निधानं प्रपद्यते। तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते। तथा च खंडवाक्यार्थबोधा
नंतरं तथैव पदार्थस्मरणात् महावाक्यार्थबोध इत्याहुः। एतेन तावद्वर्णाभिव्यंग्यः पदस्फोटोपि निरस्त
। तत्तद्वर्णसंस्कारसहितचरमवर्णोपलंभेन तत्तज्जनकेनैवोपपत्तेरिति। इदं तु बोध्यम्। यत्र द्वार
मित्युक्तं तत्र पिधेहीत्यादिपदस्य ज्ञानादेव बोधः। न तु पिधानादिरूपार्थज्ञानात्। पदजन्यपदार्थो
पस्थितेस्तत्र शाब्दबोधे हेतुत्वात्। किं च क्रियाकर्मपदानां तेनैव सहसाकांक्षत्वात्तेन क्रियाप
दं विना कथं बोधः स्यात्। तथा च श्रेयस्ते इत्यादौ स्यादित्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्ते
ः पदाध्याहार आवश्यकः। योग्यतां निर्वक्ति। पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता। ॥८॥ एक
पदार्थेऽपरपदार्थसंबंधो योग्यतेत्यर्थः। तज्ज्ञानाभावाच्च वह्निना सिंचतीत्यादौ न शाब्दबोधः। न ५४

स्यक्षपि निश्च यरूप २

न्वेतस्यायोग्यताया॥ ज्ञाने शाब्दबोधाभावः सर्वत्र न संभवति। वाक्यार्थस्यापूर्वत्वादिति चेन्न। तत्र
संहार्यस्मरणे सति क्वचित्संशयरूपस्यापि योग्यताया ज्ञानस्य संभवात्॥ न च स्तु योग्यताज्ञा
नं न शाब्दबोधे कारणम्॥ वह्निना सिंचतीत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतानिश्
श्चयेन प्रतिबंधान्न शाब्दबोधः॥ तदभावनिश्चयस्य लौकिकसन्निकर्षजन्यदोषविशेषाज
न्यतज्ज्ञानमात्रे प्रतिबंधकत्वाच्छाब्दस्यापि प्रतिबंधकत्वं सिद्धम्॥ योग्यताज्ञानविलंबाच्छा
विलंबो । ब्दबोधे सिद्ध इत्याहुः॥ आकांक्षां निर्वक्ति य ˇ देन विना यस्याननुभावकता न वेत् आकांक्षा। सा
। येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन सह तस्याकांक्षेत्यर्थः॥ क्रियापदं विना का
रकपदं नान्वयबोधं जनयतीति तेन तस्याकांक्षा॥ वस्तुतस्तु॥ क्रियाकारकपदानां सन्निधा
नमात्रस्यान्वयितार्थः परं तु घटकर्मताबोधं प्रति घटपदोत्तरं द्वितीयारूपाकांक्षाज्ञानं कार

सि.मु.
५५

ह
णं।तेनघटः कर्मत्वमानयनंकृतिरित्यादौनशाब्दबोधः।अयमेतिपुत्रोराज्ञः पुरुषोपसार्यता
मित्यादौपुत्रेणसहराजपदस्यतात्पर्यग्रहेतेनैवान्वयबोधः।पुरुषेणसहतात्पर्यग्रहेतुतेनस
हान्वयबोधःस्यादेव।तात्पर्यंनिर्वक्ति।वक्तुरिच्छातुतात्पर्यंपरिकीर्त्तितं।८४।।यदिहितात्पर्यज्ञा
नंकारणंनस्यात्तदासैंधवमानयेत्यादौक्वचिदश्वस्यक्वचिल्लवणस्यबोधइतिनस्यात्।।
नचता स्पर्यग्राहकाणांप्रकरणादीनांशाब्दबोधेकारणत्वमस्त्वितिवाच्यम्।तेषामननु
गमात्।तात्पर्यज्ञानजनकत्वेनतेषामनुगमेतुतात्पर्यज्ञानमेवलाघवात्कारणमस्तु।इत्थंच
वेदस्थलेपिता त्पर्यज्ञानार्थमीश्वरःकल्प्यते।नचतत्राध्यापकतात्पर्यज्ञानंकारणमि
तिवाच्यम्।सर्गादावध्यापका भावात्।नचप्रलयएवनास्तिकुतःसर्गादिरितिवाच्यम्
।प्रलयस्यागमप्रतिपाद्यत्वात्।इत्थंचशुकवाक्येपीश्वरतात्पर्यज्ञानंकारणम्।विसंवा ५५

नं

दिष्टुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञा कारणम्। अन्ये तु नानार्थादौ क्वचिद् वक्तृतात्पर्यज्ञानं का-
रणं तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः। वेदे त्वनादिमीमांसापरिशोधिततर्कैरेवार्-
थावधारणमित्याहुः॥ पूर्वमनुभवस्मरणभेदाद् बुद्धेर्द्वैविध्यमुक्तं तत्रानुभवप्रकारा दर्शिताः
सुगमतया स्मरणं न दर्शितं। तत्र पूर्वानुभवः कारणं। अत्र केचित्। अनुभवत्वेन न कारणत्वे
किंतु ज्ञानत्वेन। अन्यथा स्मरणोत्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य
